याचकेति - रामपक्षे-वीर्यमुख्यागुणाः सौजन्यादयः तेषां सिंधुः समुद्रः, कोविदगणः विद्वत्समूहः याचकाभीष्टस्य प्रदाने सामर्थ्यं समर्थत्वं आप्तं प्राप्तम् । याचकेभ्यः यथाभिलषितं, प्रददातीत्यर्थः । शूराः सेनाः अनीकिन्यः तासां जातं समूहः यस्य तं (?) नि. ''जातं जनिसमूहयोः। उत्पन्नभूतयोर्जातं त्रिषु क्ली जातिबृंदयोः ।'' विचित्रवीर्योद्भवं विचित्रः अद्भुतः वीर्योद्भवः प्रभावाविर्भावः यस्य तं । नि. वीर्यं बले प्रभावे च तेजः सामर्थ्ययोरपि''। दशरथस्य इन्द्रसाहाय्यकरणेन तद्वीर्यस्याश्चर्यकरत्वम् । यं दशरथं आजं अजमहाराजसंबंधिनं संतानम् अपत्यं शंसति । स दशरथः तामयोध्यामधिवसतीति संबंधः। नि. संतानास्युरविच्छित्ति-वंशापत्यसुरद्रुमाः (?)'' ।

''संतानः संचये गोत्रे स्यादपत्ये सुरद्रुमे'' ।

अन्यत्र (कृष्णपक्षे) - कोविदगणः विद्वत्समूहः, याचकाभीष्टप्रदाने संतानं कल्पवृक्षं, वीर्याः श्रेष्ठाः गुणाः सौजन्यादयः तेषां सिंधुराजं समुद्रं । नि. ''देशे नदविशेषेऽब्धौ सिंधुर्ना सरितिस्त्रियाम्''। ''राजा प्रभौ नृपे चन्द्रे यक्षे क्षत्रिय शक्रयोः ।'' विचित्रवीर्योद्भवं अद्भुततेजः, प्रादुर्भावम् यं वसुदेवं शूरसेनात् तदाख्याद्राज्ञः जातं उत्पन्नं शंसति आख्याति । स वसुदेवः तां मधुरापुरीम् अधिवसतीति ।

अन्यत्र (युधिष्ठिरपक्षे)-सामर्थ्यं सर्वकार्यकरणाप्रतिहत-प्रभावमाप्तं याचकाभीष्ट प्रदाने संतानं कल्पवृक्षं यं पाण्डुं विचित्रवीर्यात् तदाख्यात् शंतनुतनयात् उद्भवः संभवः यस्य तादृशं शंसति आख्याति । शेषं पूर्ववत् । स पाण्डुः तां हस्तिनापुरीम् अधिवसतीति ।

In Public domain. Digitization Muthulakshmi Research Academy

अव - अथ त्रयाणामपि राज्ञामुद्वाहं वर्णयति -

10. वीर्यस्य शक्त्या मदनांचिताभो, श्रीकौसलेशस्य भवामुदूहे ।
कुंतीं चमूं वैरि गणस्य हंता, रुच्या महत्या स्तुतदेवकस्य ॥१०

वीर्यस्येति - मदनस्य अंचिता प्रकाशिता आभेवाभा यस्य सः मदनांचिताभः । मदन सुन्दर इत्यर्थः । वीर्यस्य पराक्रमस्य शक्त्या उत्साहादि शक्त्या वैरिगणस्य शत्रुसमूहस्य कुन्तीं कुन्ताः प्रासाः अस्यां संतीति कुन्तीं (?) चमूं सेनां हन्ता संहारकः दशरथः । स्तुतदेवकस्य - स्तुताः देवकाः राजानः यं सः (?) स्तुतदेवकः, तस्य । श्री कौसलेशस्य - कौसलानां कोसलदेशीयानां ईशः प्रभुः श्रीयुक्तश्चासौ कौसलेशः तस्य राज्ञः महत्या रुच्या भवां उत्पन्नां (?) कौसल्याम् उदूहे उदवहत् ।

अन्यत्र - श्रीकृष्णपक्षे - श्रीकौ श्रीयुक्ता कुः भूमिः तस्यां । नि. ''गोत्राकुः पृथिवीपृथ्वी'' । वीर्यस्य बलस्य लेशस्य लवस्य शक्त्या सामर्थ्येन । वैरिगणस्य कुन्तीं चमूं हंता नाशकः । महत्या रुच्या स्तुतः देवकः तदाख्यप्रभुः तस्य भवां उत्पन्नां (?) देवकीं स वसुदेवः उदुहे ॥

युधिष्ठिर पक्षे - श्रीकौ भूवि मदनांचिताभः वीर्यस्य लेशस्य शक्त्या वैरिगणस्य चमूं हंता स पाण्डुराजः । दीव्यतीति देवः, राजा । ''दिव् क्रीडायां'' । देव एव देवकः । स्तुतः यो देवकः कुंतिभोज इति राजा तस्य भवां उत्पन्नां (?) कुन्तीं कुन्तीदेवीमुदूहे ॥ नि.''राजा भट्टारको देव'' इत्यमरः । ''वीर्यं जले प्रभावे च''। शक्तिरस्त्रांतरे गौर्यामुत्साहादौ बले स्त्रियां'' । ''प्रासस्तु कुन्त'' इत्यमरः इन्द्रवज्रावृत्तं

In Public domain. Digitization Muthulakshmi Research Academy

- स्यादिंद्रवज्रा ततजास्ततोगौ'' इति लक्षणात् ॥

11. गद्यम् - अथ रथमारुह्य विहारमार्गे चरतः सप्रमदस्यानंतगिरस्तपस्विनो मरणभीयुतस्यापराधिनोऽस्य मनोऽधिकं सतापमभूत् ॥ ११

अर्थात् - अथ अनंतरं रथं स्यंदनमारुह्य अधिष्ठाय विहारमार्गे विनोदमार्गे । नि. ''मार्गो मासे मृगमदेऽन्वेषणे पथि सौम्यभे'' । इति । चरतः गच्छतः सप्रमदस्य हर्षसहितस्य गर्वसहितस्य च । अत्र च सलिलादानसमये घटप्रविशदुदकशब्दस्य गजपुष्करध्वनेश्च भेदमनालोच्य जलमाददानं मुनिसुतं गजभ्रान्त्या जघानेति कथाऽनुसंधेया । नि. ''गर्वे मुदे च गंधे च प्रमदः प्रमदा स्त्रियां'' । ''मदो रेतसि कस्तूर्यां गर्वे हर्षभदानयोः'' ।

''अनन्तगिरः - अनन्ताः गिरः । ''बाणविद्धे मयि मृते कथमंधवृद्धौ पितरौ जीविष्यत '' इति प्रलापवाचः यस्य तस्य । नि. ''अनंतः केशवे शेषे पुमाननवधौ त्रिषु । अनन्तं गगने क्लीबमनंता शारिभा मही''॥ तपस्विनः अंधमुनिपुत्रस्य । नि. ''मुनिदीनौ तपस्विनौ'' ।

मरणभीयुतस्य मरणे मृतौ भिया भीत्या युतस्य युक्तस्य ।

अपराधिनः - अपराधोऽस्यास्तीति अपराधी । तस्य शब्दभेदिबाणप्रयोगरूपापराधिनः । नि. ''आगोऽपराधोमन्तुश्च''। अस्य दशरथस्य मनश्चित्तं अधिकं भृशं सतापं तापयुक्तं दुःखितमभूत् ॥ स्वपुत्रं निहतं श्रुत्वा दुःखिताभ्यामंधदंपतिभ्यां त्वमप्यंते पुत्रवियुक्तो भवेरितिशप्तःसन् अतीव शुशोचेतिभावः ॥

In Public domain. Digitization Muthulakshmi Research Academy

अन्यत्र - अथ रथमारुह्य विहारमार्गे विधिविलासमार्गे चरतः गच्छतः स प्रमदस्य देवकीयुतस्य अनंतगिरः अनंतस्य अंबरस्य गिरः वचना ''दस्या देवक्या अष्टमगर्भो कंसहन्ता'' इति वचनात् । तपस्विनो दुःखिनः। नि. ''तपस्वी तापसे शोच्ये''। मरणभीयुतस्य मरणे मृतौ भियायुतस्य अपराधिनः आकाशवचनरूपापराधिनः । अस्य वसुदेवस्य मनश्चित्तं अधिकं सतापं कंसेन कृतः तापः कंसतापः । शाकपार्थिवादिवत् मध्यमपदलोपी समासः (?) । अधि अधिगतः प्राप्तः कंसतापः देवकी हननोद्योगरुपः येन तत् । अभूत् ॥

अन्यत्रः - अथ रथमारुह्य विहारमार्गे विनोदमार्गे मृगयायामिति यावत् । चरतः गच्छतः । सप्रमदस्य कुंती माद्री सहितस्य । अनंतगिरः अनंतस्य शेषस्य वाग्वि वाक् यस्य तस्य । विद्वच्छिखामणेरिति यावत् । तपस्विनः मृगरूपेण मिथुनीभूय विहरतः किंदमनामधेयस्य महर्षेः मरणे मृतौ भीयुतस्य अपराधिनः अस्य पाण्डोः मनः चित्तं अधिकं सतापं त्वमपि निधुवनाय वधूमुपगच्छन् मरिष्यसीति तदृषिशापात् दुःखयुक्तमभूत् ।

अतः - अथ दशरथः पुत्रकामेष्टिमाकलय्य पत्नीभिः सह धर्मादि पुरुषार्थचतुष्टयसंपादनोद्युक्तोऽभूत् । इति । वसुदेवः कंसेन बाधितोऽपि स्वपुत्रत्वेन भगवदवतरणं मनसि निश्चित्य कंसे कोपं वर्जयित्वा स्वपत्न्या सह पुरुषार्थचतुष्टयमतनुतेति च । पाण्डुः यमानिलेन्द्राणामभिनोश्च आह्वानं कृतवानिति च निशदयति -

१२. नरेण मन्त्रेण सगं स बध्वा
लोकेनुतोद्भासित धामयुक्तः ।
महारथो धर्मसुखप्रसेनां
समाप्य मर्त्युं कलयाम्बभूव ॥ १२

In Public domain. Digitization Muthulakshmi Research Academy

वरेणेतिः - लोकैर्भुवनैः । 'नुतोद्भासितधामयुक्तः' नुतं उद्भासितं च यद्धाम प्रभावः तेन युक्तः । नि. ''धामरश्मौ गृहे देहे स्थाने जन्म प्रभावयोः'' । ''लोकस्तु भुवने जने'' ।। महारथः दशरथः । महान् रथः स्यंदनं यस्य सः । दशस्वपि दिक्षु तद्रथस्य अप्रतिहत संचारात्, तस्य महारथत्वम् । यद्वा - ''आत्मानं सारथिं चाश्वान् रक्षन् युध्येत यो नरः । स महारथसंज्ञः स्यात् इत्याहुर्नीतिकोविदाः'' । इतरत्र - ''ऐकादश सहस्राणि योधयेद्यस्तु धन्विनाम् । शस्त्रशास्त्रप्रवीणश्च महारथ इति स्मृतः'' । इत्युक्तलक्षणः । ''अमितान्योधयेद्यस्तु स प्रोक्तोऽतिरथो बुधैः। रथीत्वेकेन योद्धा यो तन्न्यूनोऽर्धरथःस्मृतः'' । इति नीतिविदः । वरेण श्रेष्ठेन । नि. ''देवप्रसादे वरणे जामाता वरः पुमान् । क्लीबे तु कुंकुमे श्रेष्ठे त्रिषिष्टे त्वव्ययं वरम्'' । मन्त्रेण वेद मंत्रेण । नि. वेदभेदे गुप्तवादे मंत्रः'' मन्त्रो विचारे वेदांशे देवादीनां च साधने । गुह्यवादेऽपि च मनौ पुमान्''। मन्युं यागं समाप्य निर्वर्त्य वध्वा समं स्त्रिया सह । जातावेकवचनम् । कौसल्या कैकेयीसुमित्राभिः तिसृभिः पत्नीभिरित्यर्थः । धर्ममुखप्रसेवां प्राजापत्यपुरुषप्रमुखानां प्रसेवाम् आराधनं कलयाम्बभूव अकरोत् ।

अन्यत्र - लोकैः जनैः नुतः विनुतः । उद्भासित धामयुक्तः प्रकाशमानदेहसंयुक्तः । यद्वा - प्रकाशमान गृहसंयुक्तः । महारथः वसुदेवः वरेण श्रेष्ठन मन्त्रेण विचारेण'' जातं सुतं कंसाय समर्प्य देवकीं मोचयिष्यामि''-इति । विष्णुर्मम पुत्रत्वेनावतरिष्यतीत्याकारेण च । मन्युं कंससंबंधिनं कोपं समाप्य वर्जयित्वा, वध्वा समं देवक्या सह । धर्ममुखप्रसेवां चतुर्णां पुरुषार्थानां प्रसेवा भजनं कलयाम्बभूव ।।

In Public domain. Digitization Muthulakshmi Research Academy

अन्यत्र-लोकैः भुवनैर्जनैश्च नुतः सन्नतः । उद्भासितधामयुक्तः प्रकाशमानरश्मियुक्तः । महारथः स पाण्डुः मन्युं दैन्यं समाप्य निर्वर्त्य वरेण श्रेष्ठेन मन्त्रेण धर्ममुखप्रसेवां यमवायुमहेन्द्राश्विनेयानां देवानां सेवामाराधनं वध्वा समं कुन्तीमाद्रीभ्यां सह कलयाम्बभूव ।। नि.''धर्मःपुण्ये यमे न्याये स्वाभावाचारयोः क्रतौ । उपमायामहिंसायां चापे चोपनिषद्यपि'' ।। वृत्तमुपजातिः ।।

अथ श्रीराम भरतलक्ष्माणशत्रुघ्नानां, बलरामकृष्णयोश्च, धर्मपुत्र भीमार्जुननकुलसहदेवानां च प्रादुर्भावं वर्णयति -

13. श्रीरामं बलराममद्भुतगुणैर्युक्तं च धर्मोद्भवं ।
पुत्रं सद्भरतं शुभव्रजकरे सल्लक्ष्मणाभिख्यया ।
भीमं भेनकुलं दिने प्रकटितुं कृष्णं वनीपस्वदं ।
शत्रुघ्नं सहदेवमंगजनितांताभं स लेभे मुदा ।। १३

श्रीरामामिति - सन् विद्वान् स दशरथः मुदा संतोषेण शुभव्रजकरे मंगलसमूहप्रदे दिने अहनि धर्मोद्भवं धर्मेण पुत्रकामेष्ट्या उद्भवतीति तथोक्तम् । नि. ''भवौ जन्महरौ स्याताम्''। अद्भुतगुणैः सह आश्चर्यानंत-कल्याणगुणैः सह । देवं दीव्यतीति देवः तं क्रीडंतमित्यर्थः । ''दिव् क्रीडायाम्'' । अंगजनितांताभं अंगजात् मन्मथात् नितांता अधिका आभा कान्तिः यस्य तम् । वनीपस्वदं वनीपेभ्यः चायकेभ्यः स्वं धनं (सुखं वा) ददातीति तादृशं । नि. ''वनीपको याचनको मार्गणो याचकार्थिनौ'' । स्वोज्ञातावात्मनि स्वत्रिष्वात्मीये स्वोऽस्त्रियां धने । स्वराकाशे शर्मणि च ''। इति शेषः । भीमं भीषणपरेषामिति'' शेषः । नि ''भीमोऽध वेतसे घोरे शंभौ मध्यमपांडवे'' । भेनकुलं भानां भासां इनः प्रभुः भेनः सूर्यः

In Public domain. Digitization Muthulakshmi Research Academy

तस्य कुलं वंशं प्रकटितुं प्रख्यातं कर्तुं । सूर्यवंशः श्रीरामोत्पत्त्या देदीप्यमान इत्यर्थः । नि.स्युः प्रभारुग्रुचिस्त्विडभा भाश्च विद्युति दीप्तयः''। भेनः सूर्ये निशाकरे'' । इनो भूपे खौपुंसि धनिक स्वामिनो स्त्रिषु''। कृष्णं श्यामं । नि.व्यासार्जुनाग्निहरिकोकिलकाकशूद्र तामिस्त्रपक्षकरि नीलगुणेषु कृष्णः । द्रव्ये त्रिषु द्रुपदजा तटिनीकणा च कृष्णाऽधलोह ....''।। श्रीरामं तन्नामकं, भरतं तदभिधम् । सलक्ष्मणाभिख्यया सत्या साध्व्या लक्ष्मणाभिख्यया लक्ष्मण इति नाम्ना युक्तं संयुतम् । लक्ष्मणमिति यावत् । नि. अभिख्यात्वभिधाने स्यात् शोभायां च यशस्यपि''। शत्रुघ्नं च तदाख्यं च पुत्रं तनयं लेभे आप ।।

अन्यत्र - सः वसुदेवः मुदा संतोषेण शुभव्रज करे दिने बलरामं तदाख्यं धर्मोद्भवं धर्मार्थं उत्पन्नं तदुक्तं गीतायां - ''यदा यदा हि धर्मस्य ग्लानिर्भवति भारत । अभ्युत्थानमधर्मस्य तदाऽऽत्मानं सृजाम्यहम् ।।'' इति भगवद्वचनात् । अद्भुतगुणै आश्चर्यकरसौजन्यादिभिः सह देवं क्रीडंतं भीमं भयंकरं दुष्टानामितिशेषः । सलक्ष्मणा श्रीवत्सादि शोभन-चिह्नेन युक्तं सहितं । शत्रुघ्नं कंसादि रिपुकुलध्वंसकं । वनीपस्वदं याचकेभ्यो द्रव्यप्रदं । श्रीरामं श्रिया कान्त्या रामं श्यामं । सद्भरतं सत्सु सत्पुरुषेषु भरतः नटः तं । नि.''भरतः शबले रामानुजे भारतवर्षके । दुष्यंतजे नटी नाट्यशास्त्रकृत्तंतुवाययोः''। भेनकुलं भानां नक्षत्राणां इनः प्रभुः भेनः चन्द्रः तस्य कुलं वंशं प्रकटितुं प्रख्यातं कर्तुं । भगवदतारादेव चन्द्रकुलप्रसिद्धेरितिभावः । अभिख्यया नाम्ना कृष्णं च तदाख्यं च । एतादृग्विशेषणविशिष्टं पुत्रं तनयं लेभे । नि. ''अभिख्यानामशोभयोः'' ।

In Public domain. Digitization Muthulakshmi Research Academy

अन्यत्र - सः पाण्डुः मुदा संतोषेण शुभव्रजकरे मंगलसमूहकरे भे नक्षत्रे दिने अहनि । सद्भरतं सति सत्ये भरतं नटंतम् । श्रीरामं श्रिया कान्त्या रामं सुन्दरं धर्मोद्भवं धर्मात् यमात् उद्भवं उत्पन्नं धर्मराजं, बलरामं बलेन स्थौल्येन सैन्येन च सेनानायकत्वादिति भावः । रामं मनोहरं भीमं भीमसेनं अद्भुतगुणैः आश्चर्ययुक्तैः गुणैः संधिविग्रहादिभिः षड्भिः युक्तं संगतं । सल्लक्ष्मणा शुभलांछनेन नि. ''कलंकांकौ लांछनं च चिह्नं लक्ष्म च लक्षणम्''। अभिख्यया नाम्ना शत्रुघ्नं शत्रुसंहारकं । नि.''अभिख्यानाम शोभयोः''। वनीपस्वदं अर्थिनामभीष्टफलप्रदायकमिति यावत् । अंगज नितांताभं मन्मथाधिकसुंदरमित्यर्थः । एतादृशं कृष्णं अर्जुनं नि.''कृष्णः श्यामेऽर्जुने हरौ''। नकुलं तदाख्यम् । सहदेवं तन्नामानं च पुत्रं तनयं लेभे आप । शार्दूलविक्रीडितंवृत्तं ।। लक्षणंतूक्तम्।।

अवः अथ श्रीराम बलभद्र युधिष्ठिर जननात् तत्तत्कुलस्य श्रेष्ठत्वं वर्णयति-

14. तमोनुद्वंशं भासुरतरमधात् सोऽब्जनयनो
निजप्रादुर्भावादमर गणसंस्तुत्यविभवात् ।
वदान्यो रामश्री रुचिर सुरसालेवधगितः
परेषां कल्याण व्रजविद महाधामसहितः ।। १४

तमोनुदिति - अब्जनयनः अब्जे कमले इव नयने नेत्रे यस्य सः। श्रीरुचिरसुरसालः श्रिया संपदा रुचिरः मनोहरः सुरसालः सुराणां देवानां सालः कल्पवृक्षः स इव (?) वदान्यः दानशौण्डः । नि.''वदान्यो दानशौण्डे स्यात् वदान्यो चारुभाषिणि''। परेषां शत्रूणाम् । कल्याण व्रजविदमहाधामसहितः - कल्याणानां शोभनानां व्रजं समूहं विशेषेण द्यति खंडयतीति तादृशं यत् महत् धाम प्रभावः तेन सहितः । धगितः

In Public domain. Digitization Muthulakshmi Research Academy

प्रकाशमानः रामः दाशरथिः अमरगणसंस्तुत्यविभवात् - अमराणां त्रिदशानां गणः समूहः तेन संस्तुतः सन्नुतः विभवः वैभवं यस्य तस्मात्। निजप्रादुर्भावात् स्वकीयाविर्भावात् । तमोनुत् सूर्यः तस्य वंशं कुलम् । भासुरतरं प्रकाशमानं अधात् अकरोत् । नि. ''चन्द्राग्न्यर्कास्तमोनुदः''।

अन्यत्र - अब्जनयनः कमलाक्षः । श्रीरुचिरसुर सालः संपत्प्रकाशमानदेववृक्षः स इव वदान्यः दाता परेषां रिपूणाम् । कल्याणव्रजविद महाधामसहितः मंगल समूहभेदन प्राज्यप्रभावयुतः । धगितः प्रकाशमानः । रामः बलरामः। अमरगणसंस्तुत्यविभवात् देवबृन्द नुत वैभवात् । निजप्रादुर्भावात् स्वकीय-जननात् । तमोनुद्वंशं चन्द्रकुलं भासुरतरं दीप्यमानं अधात् चक्रे ।।

अन्यत्र - अब्जनयनः कमलाक्षः । रामश्रीरिति छेदः । रामा अभिरामा श्रीः शोभा यस्य सः राम श्रीः । नि. ''बले रामो नीलचारु-सितेत्रिषु'' । इति । रुचिर सु रसालः रुचिरः रमणीयः सु शोभमानः रसालः आम्रः स इव वदान्यः चारुभाषी । नि. आम्रश्चूतो रसालोऽसौ सहकारोऽतिसौरभः'' । धगितः प्रकाशमानः । परेषां इतरेषां कल्याण व्रजविद महाधामसहितः-कल्याण व्रजस्य मंगलसमूहस्य विदम् । विशेषेण ददातीति विदं आदायकमित्यर्थः । तादृशं यन्महत् धाम प्रभावः तेन सहितः परोपकरणशीलाधिकप्रभाव इत्यर्थः । एतादृग्विशेषणविशिष्टः स युधिष्ठिरः तमोनुद्वंशं चंद्रवंशं । भासुरतरं देदीप्यमानमधात् । चक्रे 'दोऽवखंडने' - दा दाने इति च धातू । शिखरिणीवृत्तम् - ''रसै रुद्रौश्छिन्ना यमनसभला गः शिखरिणी'' ।। इति लक्षणात् ।।

In Public domain. Digitization Muthulakshmi Research Academy

15. गद्यः - सोऽयं धर्मभवः स्वश्रिते जनके धृतराष्ट्रं च प्रमदाश्लिष्टेन गुणेनानंदव्रजं देदीप्यमानं चक्रे ॥ १५

स इति - धर्मात् पुत्रकामेष्टिरुपात् भवः उत्पन्नः (?) सोऽयं रामः दाशरथिः प्रमदाश्लिष्टगुणेन प्रमदेन संतोषेण आश्लिष्टः संगतः गुणः सौजन्यादिः तेन । स्वश्रिते स्वैः धनैः श्रिते आश्रिते । जनके ताते दशरथे विषये देदीप्यमानं भासमानं धृतराष्ट्रं धृतःराष्ट्रः यस्य तं (?) । आनंदव्रजं आनंदानां व्रजः समूहः तं चक्रे अधात् ॥

अन्यत्र - धर्मभवः धर्माय भवः पुण्याय उत्पन्नः (?) । नि. ''धर्मः पुण्ये यमे न्यायेस्वभावाचारयोः क्रतौ । उपमायामहिंसायां चापे चोपनिषद्यपि'' । सोऽयं बलरामः जनके ताते वसुदेवे स्वश्रिते स्वान् ज्ञातीन् श्रिते प्राप्ते । मधुरावासिनि सतीत्यर्थः । प्रमदाश्लिष्टेन प्रमदेन संतोषेण आश्लिष्टेन संगतेन गुणेन सौजन्यादिना (आ) नंदव्रजं नंदस्य (?) तदाख्य गोपाधिपस्य व्रजं गोकुलम् । नि.''व्रजागोष्ठाध्वसंचयाः''। धुतराष्ट्रंच धृतो राष्ट्रो येन तं धृतराष्ट्रं च देदीप्यमानं चक्रे अधात् ॥

अन्यत्र - धर्मभवः धर्मात् यमात् भवः संभूतः (?) सोऽयं युधिष्ठरः जनके पितरि पाण्डौ । प्रमदाश्लिष्टेन प्रमदायाः माद्र्याः आश्लिष्टेन आलिंगनेन । भावे कः । स्वश्रिते स्वः स्वर्गं प्राप्ते सति । किंदमनाम मुनिशापेनेति भावः । धृतराष्ट्रं तदाह्वयं स्वपितृव्यं गुणेन सौजन्यादिना देदीप्यमानं प्रकाशमानं आनंदव्रजं आनंदं व्रजति गच्छतीति तादृशम् । समाधिगतानंदमित्यर्थः । ''व्रज गतौ'' । चक्रे चकार । नि. ''स्वोज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने'' । ''स्वराकाशे शर्मणि च'' । इति शेषः ॥

In Public domain. Digitization Muthulakshmi Research Academy
अवः - अथ दाशरथि युधिष्ठिरयोः गुरुमुखात् वेदवेदांगाध्ययनं, भगवता कृष्णेन वसुदेव प्रत्यायनाय शंखचक्रादिमंडित स्वरूपदर्शनं च कथयति -

16. प्रियं स कान्तस्य गुरोः प्रकुर्वन् सुराग भक्तौघसुखप्रदायी ।
अयं स्वरूपं प्रभुरागमानां वेद्यं सुधाम्नोऽकलयत्स्वकीयम् ॥१६

प्रियमति - सुरागभक्तौघसुखप्रदायी - सुराणां निर्जराणां अगः कल्पवृक्षः स इव । भक्तानां दासानां ओघः समूहः । तस्य सुखप्रदायी संतोषप्रदः सोऽयं प्रभुः श्रीरामः कान्तस्य मनोहरस्य गुरोः आचार्यस्य वशिष्ठस्य प्रियं इष्टं कुर्वन् । शुश्रूषन्नितियावत् । सुधाम्नः सुप्रभावात् । शोभनं च तत् धाम सुधाम तस्मात् वेद्यं ज्ञेयम् । स्वकीयं आत्मीयं । आगमानां वेदशास्त्राणां स्वरूपं तत्वम् । अकलयत् अध्यगात् ।

अन्यत्र - सुरागभक्तौघसुखप्रदायी - कल्पवृक्ष इव भक्तबृन्दस्य सुखप्रदः । सोऽयं प्रभुः श्रीकृष्णः । सकान्तस्य देवकी सहितस्य । नि. ''प्रमदा मानिनी कान्ता'' । गुरोः पितुः वसुदेवस्य प्रियं कुर्वन् । सुधाम्नः सुप्रभावात् । आगमानां वेद्यं उपनिषत्प्रतिपाद्यं स्वकीयं आत्मीयं स्वरूपं चतुर्भुजाकारं अकलयत् अदर्शयत् । ''कलिः कामधेनुः'' । नि. ''गुरु र्निषेकादिकरे पित्रादौ सुरमन्त्रिणि । दुर्भरालघ्वनल्पेषु गुरुर्महति चान्यवत् ।''

अन्यत्र - सुरागभक्तौघसुखप्रदायी - सुष्ठु रागः सुरागः । नि.''रागोऽनुरागे मात्सर्ये'' । इति । सुरागेण भक्तौघस्य सुख प्रदायी। सोऽयं प्रभुः युधिष्ठिरः । कांतस्य रमणीयस्य । नि. ''कान्तं मनोहरं रुच्यं मनोज्ञं मंजु मंजुलम्''-इत्यमरः । गुरोः आचार्यस्य द्रोणस्य ।

In Public Domain. Digitized by Muthulakshmi Research Academy

प्रियं कुर्वन् । युधिष्ठिरः पुत्रमात्रास् पैद्य ज्ञेय स्वकीय आत्मीय आगमानां स्वरूपं तत्वम् अकलयत् अधीतवान् । वृत्तमुपजातिः । ''उपेन्द्रवज्रा जतजा स्ततोगौ, स्यादिन्द्रवज्रा ततजास्ततोगौ । अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः । इत्थंकिलान्यास्वपमिश्रितासु वदन्ति जातिष्विदमेव नाम''।। इति लक्षणात् ।।

अव :- अथ रामस्य विश्वामित्र यागसंरक्षणार्थं निर्गमनं, कंसभीत वसुदेव देवकी सकाशात् कृष्णस्य नंदगोकुलागमनं, धनुर्विद्याप्रवीणान् युधिष्ठिरादीन् असमर्थांश्च स्वपुत्रान् दृष्ट्वा धर्मराजादीनां जतुगृहनिवासार्थं वारणावतपुरप्रवेशं च आचष्टे ।

17. विश्वामित्रोत्सवान्तप्रकरमतियुतश्चक्रपाणिः ससूनु
र्मात्रापित्रा प्रपेदे सुजनगुरुतपोभूः पदं प्रेषितोऽसौ ।
धाम्ना नंदव्रजं द्राग्विबुधगणनुतस्सद्गुणालंकृतो भां
श्छ्रीकृष्णो मंजुलाक्षाद्भुतमरिहननः सर्वलोकाभिनंद्यः ।। १७

विश्वामित्रेति - चक्रपाणिः चक्रं पाणौ यस्य सः । नि. ''चक्रो गणे चक्रवाके चक्रं सैन्यरथांगयोः । ग्रामजाले कुलालस्य भाण्डे राष्ट्रा-स्त्रयोरपि'' ।। ससूनुः सूनुना अनुजेन लक्ष्मणेन सहितः । नि. ''सूनुः पुत्रेऽनुजे रवौ'' ।। विबुधगणनुतः विबुधानाममराणां गणः समूहः तेन नुतः स्तुतः । सद्गुणालंकृतः - सद्भिः श्रेष्ठैः गुणैः अनंतकल्याणगुणै-रलंकृतः भूषितः । श्रीकृष्णः श्रिया कान्त्या कृष्णः श्यामः, भान् दीप्यमानः। धाम्ना प्रभावेण अरिहननः शत्रुसंहारकः । नि. ''धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः''। ''धामजन्म प्रभास्थान प्रभाव सुखसद्मसु'' । सर्वलोकाभिनंद्यः सर्वलोकैश्चतुर्दशभुवनैः अभिनंद्यः कीर्तनीयः । मात्रा

In Public domain. Digitization Muthulakshmi Research Academy
जनन्या कौसल्यया, पित्रा जनकेन दशरथेन प्रेषितः प्रहितः । विश्वामित्रोत्सवान्तप्रकरमतियुतः विश्वामित्रस्य कौशिकस्य उत् उन्नतः सर्वः यज्ञः तस्य अन्तः समाप्तिः तस्य प्रकरे कृतौ मत्या बुध्द्यायुतः युक्तः । असौ रामः दाशरथिः । आनंदव्रजं आनंदानां हर्षाणां व्रजः समूहः यस्य तत् । सुजनगुरु सुजनानां सत्पुरुषाणां गुरु श्रेष्ठम् । यद्वा - सुजनैः सत्पुरुषैः गुरुश्रेष्ठं । नि. गरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे'' । मंजुलाक्षाद्भुतं मंजुलानां मनोहराणामक्षाणां नेत्रेन्द्रियाणां अद्भुतं आश्चर्यकरम् । यद्वा - मंजुलानि मनोहराणि अक्षीणि नेत्राणि येषां ते मंजुलाक्षः मनुष्याः तेषां अद्भुतं आश्चर्यकरं । तपोभूः पदं तपसां भूमिः, तपोभुवः पदं स्थानम् । यद्वा - तपसा भवतीति तपोभूः विश्वामित्रः तस्य पदं आश्रमस्थलम् । नि. ''तपश्चांद्रायणादौ स्यात् ग्रीष्मे लोकान्तरेयमे । मनसश्चेन्द्रियाणां च ऐकाग्र्यं परमं तपः'' ।। इति वचनात् । नि. तपो लोके धर्ममात्रे क्लेशे शिशिरमासयोः'' । द्राक् झडिति । नि. ''स्याज्झटित्यंजसा ह्नायद्राङ्झंक्षु सपदि द्रुते'' । भेजे प्रपेदे ।।

अन्यत्र - चक्रपाणिः सूनुः पुत्रः विबुधगुणनुतः देवसमूहस्तुतः । नि. ''त्रिदशा विबूधाःसुराः'' । सद्गुणालंकृतः श्रेष्ठानंतकल्याणगुण भूषितः, भान् दीप्यमानः, धाम्ना प्रभावेण अरिहननः शत्रुसंहारकः सर्व लोकाभिनंद्यः समस्तभुवनसन्नुतः । नि. ''लोकस्तु भुवने जने''। विश्वामित्रोत्सवांतप्रकरमतियुतः - विश्वानि निखिलानि मित्राणि कुचेलादीनि तेषाम् । उत्सवानां नित्योत्सवानां, अंतः रम्यः यः प्रकरः कृतिः, तस्मिन् मत्या बुध्द्या युक्तः कुचेलादि मित्राणां शुभप्रद इत्यर्थः। मात्रा देवक्या, पित्रा वसुदेवेन, प्रेषितः विसृष्टः, सः असौ श्रीकृष्णः, मंजुलाक्षाद्भुतं, मंजुलाक्षाणां मनोहराक्षाणां अद्भुतम् आश्चर्यकरं, सुजनगुरु सुजनानां सत्पुरुषाणां गुरु श्रेष्ठं, तपोभूः तपसां स्थानं । नि. ''भूः

पृथिव्यां स्थानमात्रे'' । नंद्रेज नंदगोकुलं । पदं स्थानम् आवसथं प्रपेदे प्राप ॥

CC-0. In Public Domain. Digitized by Muthulakshmi Research Academy

अन्यत्र - पित्रा धृतराष्ट्रेण । तस्य पितृव्यत्वेऽप्युपचारात् पितृत्वोक्तिः । प्रेषितः, प्रहितः । ससूनुः सूनुभिरनुजैः भीमार्जुननकुलसहदेवैः सहितः । विश्वामित्रोत्सवान्तप्रकरमतियुतः विश्वस्य प्रपंचस्य ये अमित्राः शत्रवः तेषामुत्सवानां शुभकर्मादीनां अन्तः नाशः । नि. ''मह उद्भव उत्सवः'' । नि. अंतोऽस्त्री निश्चये नाशे स्वरूपेऽग्रेऽन्तिकेऽन्तरे । मृताववसिते रम्ये समाप्तावन्त इष्यते'' ॥ तस्य प्रकरे कृतौ मतिः बुद्धिः तया युतः । सर्वशत्रुकार्यहन्तेति यावत् । चक्रपाणिः चक्रं राष्ट्रं पाणौ यस्य सः चक्रपाणिः हस्तगतस्वराज्य इत्यर्थः । धाम्ना प्रभावेण अरिहननः शत्रुसंहारकः सर्वलोकाभिनंद्यः सर्वलोकैः समस्तजनैः अभिनंद्यः कीर्तनीयः । विबुधगणनुतः विबुधानां कोविदानां गणः समूहः तेन नुतः स्तुतः । नि. विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः''। सद्गुणालंकृतः सद्भिः श्रेष्ठैः गुणैः सौजन्यादिभिः, संधिविग्रहादिभिर्वा । अलंकृतः भूषितः । नि. ''सन्धिर्ना विग्रहो यानमासनं द्वैधमाश्रयः ।'' इति संध्यादयः षड्गुणाः प्रसिद्धाः ।

श्रीकृष्णः श्रिया लक्ष्म्या वाण्या च, सर्वं करोतीति कृष्णः । लक्ष्मीवाणीभ्यां सर्वकार्यकर इति यावत् । नि. ''श्रीर्वेषरचना शोभासंपत्सरलशाखिषु । वाणीलक्ष्मीलवंगेषु विषे बिल्वेऽप्यथ त्रिषु'' । डुकृञ् करणे''। असौ तपो भूः तपः यमः तस्माद्भवतीति तपोभूः युधिष्ठिरः । मंजुलाक्षाद्भुतं मंजु मनोहरं लाक्षाद्भुतं लाक्षया जतुना अद्भुतं आश्चर्यकरं । नि. ''मनोज्ञं मंजु मंजुलम्''। सुजनगुरु सुजनानां गुरु श्रेष्ठं पदं स्थानं वारणावतं ग्रामं मात्रा कुन्त्या द्राक् झडिति प्रपेदे

In Public domain. Digitization Muthulakshmi Research Academy
ययौ । नि. लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः''। इत्यमरः । नि. ''पदं व्यवसितत्राणस्थानलक्ष्मांघ्रि वस्तुषु'' । स्त्रग्धरा वृत्तमेतत् । ''म्रभ्नैर्यानां त्रयेण त्रिमुनि यतियुता स्त्रग्धरा कीर्तितेयम्'' । इति लक्षणात् ॥

अवः - अथ श्रीरामकृत ताटकावधं श्रीकृष्णकृत पूतनावधं, जतु गृहदहनं तत्सुरंगान्निर्गमनं चाह -

18. गद्य - निर्मलात्म भूदेव्यादि प्रमोदघटकः, सन्माला संशोभितः, भद्रश्रीसंगतः सुरागाश्रिताभीष्टप्रदः, प्रभूतशक्तियुत भीमसेनः, पूतनामार्तिहरोऽयं मायाजन्मस्थलीमंबरचलनपीनपयोधररसां स्वीयजनानंदकारिणीमत्यन्तभयंकरभ्रुकुटिघोरवक्त्रं दधतीं शबर कान्तां संभृत्कैतवकुलं सुंदरमणीमंतमकरोत् ॥ १८

निर्मलेति - निर्मलात्मभूदेव्यादि प्रमोदघटकः, निर्मलाः उत्कृष्टाः आत्मभूदेवाः नवब्रह्मदेवाः, ते आदिर्येषां ते निर्मलात्म भूदेवादयः, तेषां प्रमोदघटकः हर्षदायकः । नि. ''आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि'' । इत्यभिधानात् । नि. ''ब्रह्मात्मभूः सुरज्येष्ठः परमेष्ठी पितामहः'' । सन्मालासंशोभितः सतां सत्पुरुषाणां मालाः पंक्तयः तासु संशोभितः प्रकाशमानः । सत्पुरुषप्रिय इत्यर्थः । भद्रश्रीसंगतः भद्रा मंगलप्रदा श्रीः लक्ष्मीः तया संगतः संयुक्तः । सुरागाश्रिताभीष्टप्रदः सुराणां देवानां अगः कल्पवृक्षः, स इव आश्रितानां भक्तानां अभीष्टं ईप्सितं तस्य प्रदः । प्रकर्षेण ददातीति प्रदः । नि. ''अगःशैले द्रुमे भानौ''। प्रभूतशक्तियुत-भीमसेनः प्रभूता प्रचुरा शक्तिः बलं तया युता युक्ता भीमा भयंकरा सेना चमूः यस्य सः । नि. शक्तिरस्त्रांतरे गौर्यामुत्साहादौ बले स्त्रियाम्'' । पूतनामपवित्र नामधेयः आर्तिहरः आर्तिं पीडां हरतीति आर्तिहरः ।

In Public domain. Digitization Muthulakshmi Research Academy
आश्रितानामिति शेषः । अयं रामः । माया जन्मस्थली मायायाः शांबर्याः जन्मस्थलीं जन्मभूमिं । नि.''माया स्याच्छांबरी बुध्द्योः प्रकृतौ कपटेऽपि च'' । अंबरचलन पीनपयोधररसाम् अंबरे आकाशे चलनेन संचारेण पीनाः पीवराः पयोधराः मेघाः तेषां रसः बलं जलं ध्वनिश्च वा यथा स तां । स्वसंचारवेगेन जितामेघामित्यर्थः । नि. ''अंबरं व्योम्नि वाससि'' । नि. ''पीन पीव्नी तु स्थूल पीवरे'' । नि. ''स्त्री स्तनाब्दौ पयोधरौ''। नि. ''शृंगारमुख्यमधुरादिसुवर्णरेतो निर्यासरागगरलद्रव पारेदषु । आस्वादन-ध्वनिसुधाम्बु रसाख्यधातुष्विष्टो रसोऽध रसना धरणी रसा स्यात्''। नि.शृंगारादौ विषे वीर्ये गुणे रागे द्रवे रसः''।।

स्वीय जननानंदकारिणीं आनंदकरीं । अत्यन्तभयंकरभ्रकुटि घोरवक्त्रं दधतीं अत्यन्तमधिकं यथा तथा भयंकरे प्रतिभये भ्रुकुटी भ्रुवौ यस्मिन्तत् घोरमुग्रं वक्त्रं मुखं दधतीं विभ्राणाम् । शबरकान्तां शबते भ्रमतीति शबरा । ''शब भ्रमणे'' । यद्वा - शवति गच्छति वनमिति । वबयोरभेदः । शबरा च सा कान्ता सुंदरी, शबरकान्ता तां शबरकान्तां । ''शु गतौ'' । संभृत् बिभ्रत् । कैतवं कपटं तेन कुलं तनुं । मायामानुष वेष इत्यर्थः । नि. ''कपटोऽस्त्री व्याजदम्भोपधयश्छद्म कैतवे''। नि. कुलं जनपदे गोत्र सजातीयगुणेष्वपि । भवने च तनौ क्लीबम्'' । सुंदरमणीं सुंदस्य तदाख्य यक्षस्य रमणीं स्त्रियं ताटकाम् अन्तं मृति-मकरोत् अधात् । नि. ''सुंदरीरमणी रामा''- इति ।।

अन्यत्र - निर्मलात्मभूदेवादिप्रमोदघटकः उत्कृत ब्रह्मदेवादि संतोषकरः । सन्माला संशोभितः श्रेष्ठवनमालाप्रकाशमानः । भद्रश्री संगतः भद्रेति श्रीकृष्णस्य प्रियांगना । भद्रा च श्रीश्च भद्रश्रियौ । ताभ्यां संगतः संयुक्तः ।

In Public domain. Digitization Muthulakshmi Research Academy

सुरागाश्रिताभीष्टप्रदः - कल्पवृक्ष इव भक्ताभीप्सितदायकः, प्रभूतशक्तियुतभीमसेनः - अधिकसामर्थ्ययुतभयंकरसेनः, आर्तिहरः - पीडानिवारकः । नि. ''आर्तिः पीडा धनुष्कोट्योः'' इत्यमरः । अयं श्रीकृष्णः । मायाजन्मस्थलीं - मायायाः कपटस्य जन्मस्थलीं जन्मभूमिम् । नि. ''मायास्याच्छांबरी बुध्द्योः प्रकृतौ कपटेऽपि च''। अंबरचलनपीन पयोधररसाम् - अंबरे वस्त्रे चलनौ चलितौ पीनौ पीवरौ पयोधरौ स्तनौ तयोः रसः गरलं, शृंगाररसो वा यस्यास्ताम् । नि.''शृंगारादौ रसे वीर्ये गुणे रागे द्रवे रसः'' । स्वीयजनानंदकारिणीं - स्वीयजनानां स्वकीय जनानां आनंदकारिणीं आनंदकरीं । अत्यंतभयंकर भ्रुकुटि घोरवक्त्रं दधतीं (व्याख्यातं) - शबरकान्तां-पूर्ववत् व्याख्येयम् । सुंदर-मणीं - सुंदर्यः रम्याः मण्यः मणयः यस्यास्ताम् । 'मणि' शब्दस्य ईबन्तत्वमपि । कैतवकुलं कपटतनुं संभृत् बिभ्रत् । लीलामानुष इत्यर्थः । पूतनां तदाख्यां राक्षसीम् अन्तं मरणम् अकरोत् व्यधितः संहृतवानित्यर्थः।

अन्यत्र - निर्मलात्मभूदेवादिप्रमोदघटकः - निर्मलाः शुध्दाः आत्मानः स्वभावाः येषां ते - निर्मलात्मानः, भूदेवाः ब्राह्मणाः, ते आदि-र्येषां ते जनाः तेषां प्रमोदघटकः संतोषप्रदः । नि. ''आत्मा जीवे धृतौ देहे स्वभावे परमात्मनि'' । ''द्विजात्यग्रजन्म भूदेव बाडबाः'' । सन्माला संशोभितः - सतां नक्षत्राणां मालाः सप्तविंशति मौक्तिकमालाः ताभिः शोभितः प्रकाशमानः । नि. ''सैव नक्षत्रमालास्यात् सप्तविंशति मौक्तिका'' इत्यमरः । ''सत्क्लीबमृक्षे सन् साधौ विद्यमानेऽग्रिये त्रिषु । ''सत्ये साधौ विद्यमाने प्रशस्तेऽभ्यर्हिते च सत् । भवान्यां तु सती स्त्री स्यात् नक्षत्रेसन्नपुंसकम्'' । इति शेषः ।। भद्रश्रीसंगतः - भद्रश्री चन्दनः तेन संगतः लिप्तः । नि. गंधसारो मलयजो भद्रश्रीश्चंदनोऽस्त्रियाम्''।। सुरागाश्रिताभीष्टप्रदः - सुरागः शोभनानुरागः तेन आश्रिताभीष्टप्रदः -

In Public domain. Digitization Muthulakshmi Research Academy
स्वाश्रितजनेष्टवस्तुप्रदायकः । प्रभूतशक्तियुत - भीमसेनः - प्रभूता प्रचुरा शक्तिः बलं तथायुतः युक्तः भीमसेनः वृकोदरः । नि. ''प्रभूतं प्रचुरं प्राज्यमदभ्रं बहुलं बहु ।'' पूतनामा पवित्रनामधेयः । ''धर्मो विवर्धति युधिष्ठिरकीर्तनेन, पापं प्रणश्यति वृकोदर कीर्तनेन । शत्रु र्विनश्यति धनंजय कीर्तनेन, माद्रीसुतौ कथयतां न भवंति रोगाः''।। इति प्रमाणात् ।। आर्तिहरः पीडा निवारकः । अयं युधिष्ठिरः भीमो वा । माया जन्मस्थलीं मायायाः शांबर्याः जन्मस्थलीं जन्मभूमिम् अंबरचलन पीनपयोधररसाम् - अंबरे वस्त्रे, यद्वा - अंबरेण व्यसनेन चलनौ चलितौ पीनौ पीवरौ पयोधरौ स्तनौ तयोः रसः शृंगाररसः यस्या-स्ताम् । नि. ''अंबरं व्यसने व्योम्नि कार्पासे च सुगंधिनि'' - इति विश्व प्रकाशः । स्वीय जनानंदकारिणीं स्वकीयजनसंतोषकरीं, अत्यंत भयंकर भ्रुकुटि घोरवक्त्रं दधतीम् - अधिक भयंकर भ्रूघोरमुखधारिणीम् । सुंदरमणीं रम्यरत्नाम् । एतादृशीं शबरकांतां शबरस्त्रियं संभृत् बिभ्रत् । कैतवकुलं कपटमंदिरं । लाक्षागृहमित्यर्थः । अन्तमकरोत् नाशं चकार । ददाहेत्यर्थः । जतुगृहविषये ''शबरकान्तां संभृ'' दित्यत्र धर्मराजादीन् विषादिना हन्तुं दुर्योधनेन प्रहितेति भारतकथात्रानुसंधेया ।।

अथ-भंजित ताटकेन श्रीरामेण विश्वामित्रादीनां संतोषणं, संहत पूतनेन श्रीकृष्णेन नंद गोकुलानंदनं, भीमेन कुन्त्यादीनां च अरण्यप्रवेशनं चाह-

19. महावनं मंजुनिनाय वीर्या
द्दरोद्धृतं स्वीयजनं व्रजन् द्राक् ।
सुभोग बृंदं कुहराद्विभिन्नं
देवात्प्रपूज्यो विभवः सधीरः ।। **१९**

In Public domain. Digitization Muthulakshmi Research Academy

महावनमिति - धीरः विद्वान् । कुहरात् पापहरात् । नि. ''पाप कुत्सेषदर्थेकु''। देवात् अमरात् । नि. अमरा निर्जरा देवाः''इत्यमरः। प्रपूज्यः प्रकर्षेण पूजितुं योग्यः प्रपूज्यः, विभवः वैभवः (?) सः श्रीरामः। मंजु मनोहरं, महावनं, महारण्यं, सिद्धाश्रममिति यावत् । व्रजन् गच्छन् सन् । वीर्यात् प्रभावात् । नि. ''वीर्यं बले प्रभावे च'' । दरोद्धृतं दरात् ताटका प्रतिबंधकरुप भयात् । नि. ''दरोऽस्त्रियां भये श्वभ्रे''। ''दरोऽस्त्री शंखभययोर्गर्त्रेऽपि च .... दरंत्वव्ययमल्पार्थे ।। इति । उद्धृतं मोचितं । विभन्नं विशेषेण भिन्नं संगतं । नि.भिन्नमत्यर्थ वचने संगते दारिते स्फुटे। ''स्वीयजनम्'' विश्वामित्रादि स्वकीयजनं सुभोगबृंदं शोभन सुखसमूहं, धनसमूहं वा । द्राक् झडिति निनाय प्रापयामास । नि. ''भोगः सुखे स्त्र्यादि भृतावहेश्च फणकाययोः । कौटिल्ये पालनेऽपि स्याददीने द्रविणेऽपि च'' । इति शेषः ।

अन्यत्र - धीरः प्राज्ञः । कुहरात् पापहरात् देवादमरात् प्रपूज्यः पूजितुं योग्यः विभवः वैभवः (?) सः श्रीकृष्णः, वीर्यात् पराक्रमात् दरोद्धृतं दरात् पूतनाविषस्तन्यपानरूपभयात् उद्धृतं दूरीकृतं मंजु मनोहरं महावनं महत् उत्कृष्टमवनं रक्षणं यस्य तम् । नि. ''अवनं रक्षणे प्रीतौ''। विभिन्नं विशेषेण भिन्नं युक्तं स्वीयजनं नंदगोपादि स्वकीयजनं व्रजं घोषं द्राक् झडिति सुभोगबृंदं शोभनसुखसमूहं, धनसमूहं वा निनाय गमयामास ।।

अन्यत्र - धीरः दोषज्ञः । नि. ''विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः । धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पंडितः कविः'' । इत्यमरः । देवात् प्रकाशमानात् । दीव्यतीति देवः । ''दिव्-क्रीडाया'' मिति धातुः । वीर्यात् पराक्रमात् बलाद्वा प्रपूज्यः प्रपूजितुं योग्यः । नि. ''देवस्तु विबुधे

In Public domain. Digitization Muthulakshmi Research Academy
राज्ञि देवमाख्यातमिन्द्रियं ।'' ''राजा भट्टारको देव'' - इत्यमरः । विभवः - वेः वातात् भवः जन्म यस्य सः भीमः । नि. ''विश्वक्षुषि व्योम्नि वाते परमात्मनि पक्षिणि'' । इति विश्वासः पूर्वोक्तः वृकोदरः, वीर्यात् पराक्रमात् व्रजन्, वनं प्रतीत्यथीः । कुहरात् लाक्षागृहरंध्रात्, विभिन्नं निर्गतम् । दरोद्धृतं दरात् शत्रुकृताग्निविषरूपभयात् उद्धृतं मोचितम् । मंजु मनोहरं स्वीयजनं मातरं भ्रातृंश्च । सुभोगबृन्दं शोभन सुखसमूहं यथा भवति तथा । महावनं हिडिंबालयारण्यं द्राक् झडिति निनाय अनीनयत् । वृत्तमुपजातिः । लक्षणंतूक्तम् ॥

अव-अथ श्रीरामेण सुबाहु राक्षसनिबर्हणं, श्रीकृष्णेन अघासुरमारणं भीमसेनेन हिडिंबासुर प्रमापणं च प्रतिपादयति -

20. दातामित्राधिक समुदयानंद बृंदस्य दूरं
कृत्वा धाम्ना जलजपद संभासमानो हिडिंबम् ।
दोषाचारं मुनिजनतपो विघ्नकारं सुबाहुं
सत्कल्याणप्रदगुणयुतः सोऽपराधं जघान ॥ २०

दातेति - मित्राणां सुहृदां अधिकसमुदयः बहुसमूहः तस्य आनंदबृंदस्य सम्मदकदंबस्य दाता वदान्यः नि. ''दाताच्छता वदान्यश्च''। जलजपदसंभासमानः-जले सलिले जायत इति जलजं कमलं तस्य पदं त्राणं यस्मात् सः सूर्यः तस्मिन् भासमानः प्रकाशमानः । ''ध्येयः सदा सवितृमण्डलमध्यवर्ती''। इति प्रमाणात् । यद्वा - जलजस्य कुवलयस्य पदं त्राणं यस्मात्स चन्द्रः । स इव भासमानः । चन्द्र इव सर्वलोकाह्लादकर इत्यर्थः । सत्कल्याणप्रदगुणयुतः-प्रकर्षेण ददतीति प्रदाः, कल्याणस्य शुभस्य प्रदाः । सतां सत्पुरुषाणां कल्याणप्रदाः ये गुणाः

In Public domain. Digitization Muthulakshmi Research Academy
तैर्युतः संगतः । नि. ''सन् सत्ये विदुषि श्रेष्ठ साधौ त्रिषु सदृक्षके'' । नि.''कल्याणमक्षये स्वर्णे कल्याणां मंगलेऽपि च''। सः श्रीरामः। धाम्ना प्रभावेन डिंबं विप्लवम् । षडीतिमुखदेशोपद्रवमितियावत्। ''अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः'' । इति नि. ''डिंबे डमर विप्लवौ'' । अपराधम् अपराणां स्वीयजनानां अघं दुष्कृतं च दूरं कृत्वा नाशयित्वा । नि.''अंहो दुःख व्यसनेष्वघम्'' इत्यमरः । दोषाचारं रात्रिचरम् मुनिजनतपोविघ्नकारं - मुनिजनानां वाचंयम जनानां तपसां विघ्नकारम् अंतरायकृतम् सुबाहुं तन्नामानं असुरं जघान हि । नि. ''हि हेतावधारणे । स्फुटार्थे हि विनिश्चित्यां पादपूरे प्रकीर्तितः'' । इति शेषः ।

अन्यत्र - मित्राधिकसमुदयानंदबृंदस्य मित्रबहुसमूहामोदसंचयस्य दाता वदान्यः जलजपदसंभासमानः जलजे कमले इव पदौ चरणौ ताभ्यां संभासमानः प्रकाशमानः सत्कल्याणप्रदगुणयुतः सत्पुरुषमंगलप्रद गुणसहितः सः श्रीकृष्णः धाम्ना प्रभावेन डिंभं भयं दासानामिति शेषः । दूरं कृत्वा नाशयित्वा दोषाचारं रात्रिंचरं मुनिजनतपोविघ्नकारं तापसजन तपोभंगकारिणं सुबाहुं सुभुजं पराघं परः शत्रुः अघः अघासुरः । परश्चासौ अघश्च तम् । जघान हि । अघ इति नामैकदेशग्रहणम् ।

अन्यत्र - अमित्राधिकसमुदयानंदबृंदस्य अमित्राणां शत्रूणां अधिकसमुदयः बहुलसमूहः तस्य, आनन्दं बृंदस्य हर्षसंदोहस्य दाता छेत्ता । नि. ''दाताछेत्तावदान्यश्च''। जलजपरसंभासमनः जले जायत इति जलजः मीनः पदं नृपलक्ष्म यस्य सः मन्मथः। स इव संभासमानः प्रकाशमानः, सत्कल्याणप्रदगुणयुतः कल्याणं सुवर्णं प्रकर्षेण ददतीति प्रदाः । कल्याणप्रदाश्च ते गुणाश्च कल्याणप्रदगुणाः, सतां विदुषां

Digitized by Siddhanta eGangotri Gyaan Kosha
Prof. Satya Vrat Shastri Collection. Digitized by Sri Lalbahadur Shastri Research Academy

कल्याणप्रदगुणः नैः सुतः संगतः, सः नामः, धाम्नो प्रभावेण, पराघं परेषामितरेषामघं दुःखम् । नि. ''परः श्रेष्ठारिदूरान्योत्तरे क्लीबं तु केवले''। दूरं कृत्वा नाशयित्वा दोषाचारं निन्दिताचारं, मुनिजनतपो-विघ्नकारं तपस्विजनतपोभंगकारिणं सुबाहुं सुभुजं हिडिंबं तन्नामानं राक्षसं जघान ।

मन्दाक्रान्तावृत्तम् - मन्दाक्रान्ता जलधिषडगैर्म्भौनतौ ताद्गुरु चेत्''। इति लक्षणात् ॥

अवः - अथ श्रीरामः सुबाहुमुखकर्बुरान् संहृत्य विश्वामित्राश्रमभूमिं जनसंचारयोग्यामकरोत् इति, श्रीकृष्णः अघासुरं संहृत्य यमुनास्थितं काकोदरं रमणकद्वीपं नीत्वा कालिन्दीं जनसंचारयोग्याम् अकरोदिति, भीमसेनः हिडिंबं हत्वा तद्वनं ऋष्यादिजनसंचारयोग्यमकरोदिति चाहः-

21. स्वस्थानमाप्तं सकलावनीतले
सतं प्रकृत्वाऽधिकभीतिकारिणम् ।
चक्रे महर्षीनभुवं सुखप्रदां
नृणामहीनं समदं वनं गतम् ॥ २१

स्वस्थानमिति - सः श्रीरामः सकलावनीतले सर्वभूतले, अधिक भीतिकारिणं अत्यन्तभयकृतं, अहीनं हीनो न भवतीति अहीनः अधिकः, तं, समदं गर्वसहितं वनं अरण्यं गतं प्राप्तं तं सुबाहुनाम राक्षसं, स्वस्स्थानं स्वर्गस्थानं आप्तं प्राप्तं प्रकृत्वा प्रापय्य । संहृत्येत्यर्थः । महर्षीनभुवं महान्तश्च ते ऋषयश्च महर्षयः । महर्षीणामिनः श्रेष्ठः विश्वामित्रः, तस्य भुवं भूमिमाश्रममिति यावत् । नृणां सुखप्रदां सुखदायिनीं चक्रं वितेने। नि. ''इनो भूपे रवौ पुंसि धनिकस्वामिनो स्त्रिषु'' ॥

In Public domain. Digitization Muthulakshmi Research Academy
अन्यत्र - हर्षी, हर्षः अस्यास्तीति हर्षी, नित्योत्सववानित्यर्थः । सः श्रीकृष्णः । सकलावनीतले सर्वोर्वीतले अधिकभीतिकारिणं अत्यन्त भयकारिणं, वनं जलं गतं, प्राप्तं समदं गर्वसहितं अहीनं अहीनां सर्पाणामिनं प्रभुं कालीयं स्वस्थानं स्वकीयस्थानं रमणकद्वीपं गतं प्राप्तं प्रकृत्वा विरचय्य, प्रापय्येत्यर्थः । इनभुवं सूर्यतनयां कालिन्दीं । नि. कालिंदी सूर्यतनया यमुना शमनस्वसा''। इत्यमरः । नृणां मनुष्याणां सुखप्रदां सुखदायिनीं चक्रे ।।

('महर्षीन' इत्यत्र कृष्णपक्षे ''म'' इति न व्याख्यातं ।तच्चिन्त्यमेव ।)

अन्यत्र - स, भीमसेनः सकलावनीतले सकलोर्वीतले अधिक भीतिकारिणं अत्यन्तसाध्वसकारिणं मदेन सह वर्तत इति समदं वनमरण्यं गतं प्राप्तं अहीनं हीनो न भवतीति अहीनः तं हिडिंबं स्वस्थानं मृत्युं वीरस्वर्गं वा आप्तं प्राप्तं प्रकृत्वा प्रापय्येति यावत् महर्षीनभुवं महर्षि श्रेष्ठभूमिं, आश्रमानिति यावत् । नृणां मनुष्याणां सुखप्रदायिनीं सुखदायिनीं चक्रे ।

इन्द्रवंशा वंशस्थ वृत्तयोः संसृष्टिः - ''स्यादिन्द्रवंशा ततजै रसंयुतैः। जतौतु वंशस्थमुदीरितं जरौ''। इति लक्षणात् ।।

अव - श्रीरामेण मारीचमुखराक्षसहननात्, श्रीकृष्णेन वत्सासुरादि रात्रिंचरहननात्, भीमेन बकासुरादि दुष्ठहननात् सकललोकानां निबोधामाह -

22. गद्यः - मंजुल सद्वृन्दावन विनोदः, कुमारीचक्रव्याप्ताहित भञ्जनः, महाश्री वत्सान्तकः, मनोहराखण्डलसद्भोगः, भीमसेनो

In Public domain. Digitization Muthulakshmi Research Academy

सुरप्रमदासत्कमनाः, सहजबलविदारितबकात्मा, सकललोकानामयं निर्भयमकरोत् ॥ २२

मञ्जुलमिति - मंजुलं मनोहरं यत्, सतां सत्पुरुषाणां बृन्दं कदम्बकं, तस्य अवने रक्षणे विनोदः अतिशयः येन सः । कुमारी चक्रव्याप्ताहितभञ्जनः कुत्सितश्चासै मारीचश्च कुमारीचः, स इति क्रव्याप्तः, क्रव्यं पिशितं आप्तः, क्रव्यं पिशितमाप्नोतीति वा, क्रव्ये पिशिते आप्तः सभ्यो वा क्रव्याप्तः ।''आप लृ व्याप्तौ''। नि. ''आप्तस्स्यात्सभ्य-लब्धयोः'' । ''आप्तप्रत्ययितौ समौ''। मांसभुगिति यावत् । तस्य कुमारी च क्रव्याप्ताहितस्य भंजनः संहृतवान् महाश्रीवत्सान्तकः मह्यते पूज्यते इति महती पूज्या । ''मह पूजायां''। महती च सा श्रीश्च महाश्रीः तस्याः वत्सं वक्षः तस्मिन् अन्तकः रम्यः । यद्वा-महाश्रिया सहितं वत्सं वक्षः तेन अन्तकः रम्यः । नि. ''अरो वत्सं च वक्षश्च''-इत्यमरः । ''श्रीर्हरिहृदये वसति, तस्यास्तु हृदये हरिर्वसति'' इति । ''राघवत्वे भवेत्सीता रुक्मिणी कृष्ण जन्मनि । अन्येषु चावतारेषु विष्णोरेषानपायिनी'' । इति प्रमाणात् । यद्वा - श्रीवत्सचिह्नेन अन्तकः रम्यः । नि. ''श्रीवत्सो लांछनं मतम्'' इत्यमरः । मनोहराखण्डलसद्भोगः मनोहरः सुन्दरःखण्डो न भवतीत्यखण्डः लसन् प्रकाशमानः भोगः विभवः यस्य सः । भीमा भयंकरा सेना चमूः यस्य सः भीमसेनः । सुरप्रमदासत्कमनाः सुरेषु देवेषु प्रमदेन संतोषेण आसक्तं मनः यस्य सः । सहजबलविदारित बकात्मा सहजः अनुजः लक्ष्मणः तस्य बलं शौर्यं तेन विदारिताः बकात्मानः - कुटिला आत्मानः बुद्धयः येषां ते बकात्मानः - बकाः कुटिलबुद्धयः यस्य सः। बकति कुटिलं भवतीति

In Public domain. Digitization Muthulakshmi Research Academy

बकः । 'बक' कौटिल्ये'' कुटिलबुद्धियुतजनसंहारक इत्यर्थः । नि. समानोदर्य सोदर्य सगर्भ्य सहजाः समाः'' । नि. ''द्रविणं तरः सहो बल शौर्याणि स्थाम शुष्मं च । शक्तिः पराक्रम प्राणौ'' । ''आत्मा यत्नो धृतिर्बुद्धिः स्वभावो ब्रह्म वर्ष्म च '' ।

अयं श्रीरामः, सकललोकानां समस्तभुवनानां । नि. लोकस्तु भुवने जने''। निर्भयं भयराहित्यमकरोच्चकार ।

अन्यत्र - मंजुलसद्वृन्दावनविनोदः मंजु मनोहरं लसत् प्रकाशमानं बृन्दावनं बृन्दारण्यं तस्मिन् विनोदः आनन्दः यस्य सः । कुमारी-चक्रव्याप्ताहितभंजनः कुं पापं मारयितुं शीलमस्येति कुमारी । चक्रव्याप्ताहितभंजनः चक्रे संग्रामे व्याप्ताः व्यापकाः अहिताः शत्रवः तेषां भंजनः संहारकः । नि. ''पाप कुत्सेषदर्थेकु''। ''कु र्भूस्त्रियोः कु पापेऽल्पे कुत्सितार्थे तदव्ययम्'' । ''चक्रः कोके व्रजे पुंसि क्लीबं सैन्यरथांगयोः । ग्रामजाले कुंभकारभाण्डेचावर्तराष्ट्रयोः'' । इति प्रतापः। नि. ''चक्रं सैन्ये ग्रामजाले संग्रामे साधनान्तरे । तैलिकीये कौंभकारे चावर्ते चायुधान्तरे'' । इति शेषः महाश्रीः महती बृहती श्रीः यस्य सः । वत्सान्तकश्च वत्सासुरनाशकश्च । विशेषणसमासः । मनोहराखण्डल सद्भोगः आखण्डलः इन्द्रः, मनोहराखण्डलादपि सन् श्रेष्ठः भोगः सुखं यस्य सः इन्द्राधिकभोगवानित्यर्थः । भीमा भयंकरा सेना चमूः यस्य सः भीमसेनः । सुरप्रमदासक्तमनाः - सुष्ठु वांछितं फलं राति ददातिति सुरः । भक्तानामिति शेषः । तस्मिन् प्रमदेन संतोषेण आसक्तं मनो यस्य सः । ''रा दाने'' । सहजबलविदारितबकात्मा सहजेन स्वतःसिद्धेन ।

In Public domain. Digitization Muthulakshmi Research Academy
नि.''सहजस्तु निसर्गे ना सहोत्थे पुनरन्यवत्'' । बलेन पराक्रमेण विदारितः विच्छेदितः बकात्मा बकस्य बकवेषधारिणः बकासुरस्य आत्मा देहः यस्य सः । नि. ''पुष्प भेदे बकं, रक्षः पक्षि यक्षाधिपा बकाः'' । अयं श्रीकृष्णः सकललोकानां समस्तभुवनानां निर्भयं भयराहित्यं अकरोत् चक्रे ।।

(''भीमसेनोसुर'' इत्यत्र ''भीमसेनः सुरः'' इति छेदे विसन्धि दोषः श्रीरामकृष्णपक्षयोः गमनार्हः ।)

अन्यत्र - मंजुलसद्वृंदावनविनोदः मंजुलं मनोहरं, सतां विदुषां बृंदं कदंबकं सद्वृन्दं मञ्जुलं च तत्सद्वृन्दं च मंजुलसद्वृन्दं तस्य अवने रक्षणे विनोदः संतोषः यस्य सः । कुमारी कुमारोऽस्यास्तीति कुमारी, यद्वा - कुमाराः अश्वाः बालाः अस्य संतीति कुमारी । पंचधाराश्ववानित्यर्थः। चक्रव्याप्ताहितभंजनः चक्रे राष्ट्रे व्याप्ताः व्यापकाः अहिताः शत्रवः तेषां भंजनः विदलनः नि. ''कुमारो मन्मथे स्कन्दे युवराजेऽश्ववाचके । बाले वरणवृक्षे च द्वीपे स तु नपुंसकम्''। महाश्रीवत्सान्तकः महत् विशालं यत् श्रीवत्सं श्रिया शोभया सहितं वत्सं वक्षः तेन अन्तकः रम्यः । विशालवक्षःस्थल इत्यर्थः । मनोहराखण्डल- सद्भोगः मनोहराखण्डल इव सन् श्रेष्ठः भोगः ऐश्वर्यं सुखं वा यस्य । नि. भोगः सुखे स्त्र्यादि भृता वहेश्च फणकाययोः । कौटिल्ये पालनेऽपिस्याददने द्रविणेऽपि च'' । इति शेषः । असुरप्रमदासक्तमनाः असुरप्रमदायां राक्षसकन्यायां हिडिंबायामासक्तं मनो यस्य तादृशः । नि. ''प्रमदा मानिनी कान्ता ललना च नितंबिनीं इत्यमरः । ''मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः।। सहजबलविदारितबकात्मा सहजबलेन निसर्ग पराक्रमेण विदारितः

In Public domain. Digitization Muthulakshmi Research Academy
भंजितः बकस्य बकासुरस्य आत्मा शरीरं यस्य सः । अयं भीमसेनः वृकोदरः, सकललोकानां समस्त जनानां निर्भयं भयराहित्यम् अकरोत् चक्रे । नि. ''लोकस्तु भुवने जने'' ॥

23. वेधोजातैः स्तुतौ धामवीरवैरिकदंबकम् ।

संछित्वा स यतीनां च प्रचक्रे सौख्यसंचयम् ॥ २३

वेधा इति - वेधो जातैः वेधसः चतुराननात् जाता उत्पन्नाः सनक सनंदन सनत्कुमारादयः तैः स्तुतः । सोऽयं श्रीरामः श्रीकृष्णश्च। धामवीरवैरिकदंबकम् धाम्ना प्रभावेण वीराः शूराः वैरिणः शत्रवः तेषां कदम्बकं समूहं संछित्वा सम्यक्छित्वा यतीनां तपस्विनां च । चकारेण सर्वेषामिति ज्ञेयम् । नि. ''चोऽन्वाचयसमाहारेतरेतरसमुच्चये''। सौख्य सञ्चयं सुखबृन्दं प्रचक्रे चकार । ''वेधो जातै'' रित्यत्र युधिष्ठिरपक्षे - वेधसां विदुषां जातैः समूहैः स्तुतः । नि. ''वेधा बुधः''। इति शेषः।

अनुष्टुप्छन्दः - तल्लक्षणंतु -

पञ्चमं लघु सर्वेषु सप्तमं द्वि चतुर्थयोः ।

षष्ठं च गुरु सर्वेषामेतच्छलोकस्य लक्षणम् ॥

अव - रामः युधिष्ठिरश्च द्वावपि शत्रुवधं कृत्वा भूमण्डलमपालयताम् । श्रीकृष्णश्च वृषभासुरं हत्वा गोसमूहमपालयदित्याह -

24. वृषभासुरमोजसा प्रभित्वा -

हितमब्जायतलोचनः शरीरम् ।

धृतवान् घनसुन्दरं मनोज्ञं

स हि गोमण्डलमच्युतश्चकार ॥ २४

In Public domain. Digitization Muthulakshmi Research Academy
वृषभाति - वृषभासुरं वृषेण सुकृतेन भासुरं रम्यं घनसुन्दरं घन इव मेघ इव सुन्दरं रुचिरं, शरीरं देहं धृतवान् । मेघश्यामल-देहभृदित्यर्थः । अब्जायतलोचनः अब्जाभ्यां कमलाभ्यां । तदपेक्षयापीत्यर्थः। आयते विस्तृते लोचने यस्य सः । अच्युतः सः श्रीरामः, ओजसा पराक्रमेण अहितं शत्रुं प्रभित्वा खंडयित्वा, गोमण्डलं भूमण्डलं मनोज्ञं मनोहरं चकार हि चक्रे हि ।।

अन्यत्र - अब्जायत लोचनः कमलनेत्रः घनसुन्दरं शरीरं धृतवान्, स अच्युतः श्रीकृष्णः ओजसा पराक्रमेण अहितं शत्रुं बृषभासुरं वृषभासुर-नाम राक्षसं प्रभित्वा खंडयित्वा गोमण्डलं गोसमूहं मनोज्ञं मनोहरं चकार हि ।।

अन्यत्र - वृषभासुरं वृषेण धर्मेण भासुरं प्रकाशमानं घनसुन्दरं अधिकसुन्दरम् । नि. ''कठिनाधिकसान्द्रेषु वाद्यमध्यमनृत्तयोः । मुस्ता मुद्गरमूर्तेषु त्रिषु मेघे पुमान् घनः''।। शरीरं देहं धृतवान्, अच्युतः च्युतिरहितः, अब्जायतलोचनः स युधिष्ठिर ओजसा पराक्रमेण अहितं शत्रुं प्रभित्वा खण्डयित्वा गोमण्डलं भूमण्डलं मनोज्ञं चकार चक्रे । हि प्रसिद्धौ । नि. ''हि हेतावववधारणे'' । औपच्छन्दसिकं वृत्तम् ।।

अवतारिकाः - श्रीरामः शत्रुसैन्यं संहृत्य कौशिक याग समाप्ति मकरोदिति, श्रीकृष्णः केशिनामासुरसंयुक्त शत्रुं हत्वा कंसप्रहितमक्रूरं पूजयित्वा कंसेनारब्धधनुर्यागसमाप्तिमचिन्तयदिति, युधिष्ठिरः पथिक भूसुरवचनेन द्रौपदीविवाहोत्सवाय गच्छन् मार्गमध्ये गंधर्वराजमर्जुन पराक्रमेण निर्जित्य गंधर्वराजस्य स्वस्थानं प्रति गन्तुमाज्ञां चकारेति चाह -

In Public domain. Digitization Muthulakshmi Research Academy

25. वाहाकारं मदेना सहित परवलं ब्राह्मणोक्तं सुवाचं
गंधर्वेन्द्रं प्रभूताद्विजयभुजबलादच्युतो भान् विजित्वा ।
अंकंसप्रेषितं तं सुसहजसहितः पूजयन् तत्र मत्वा
बुद्धाक्रूरं सुधीश्चित्ररथरमसुरं ह्युत्सवान्तं चकार ॥ २५

वाहाकारमिति - सुसहजसहितः सुशोभमानः, सहजः लक्ष्मण स्तेन सहितः । नि. ''समानोदर्य सोदर्य सगर्भ्य सहजास्समाः''। इत्यमरः। सुधीः विद्वान् । नि. विद्वान्विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः''। भान् प्रकाशमानः सः अच्युतः श्रीरामः, मदेन गर्वेण । नि. मदो रेतसि कस्तूर्यां गर्वे हर्षेभदानयोः'' । वाहाकारं वहतीति वाहः, आकारः, शरीरविकारः यस्य तत् । ''वहप्रापणे'' । नि. ''आकाराविंगिताकृती''। ''आकारस्त्विंग इङिगतम् '' । आक्रियते आविष्क्रियते अभिप्रायोऽनेन इत्याकारः । ''डुकृञ् करणे'' । अंकश्चित्रयुद्धः यस्मिन् तत् (?) । नि. ''अडकः स्थानेऽन्तिके मन्तौ रूपकोत्संग लक्ष्मसु । नाटकादि परिच्छेदे चित्रयुद्धे च भूषणे''। चित्ररथरम् चित्रान् नानाविधवर्णान् रथान् स्यन्दनान् राति गृह्णाति इति । ''रा आदाने''।

गन्धर्वेन्द्रं गन्धर्वाणामश्वानामिन्द्राः श्रेष्ठाः यस्मिन् तत् (?)। यद्वा-गन्धर्वैरश्वैरिन्द्रं श्रेष्ठमिति वा । नि. वाजिवाहार्वं गन्धर्वं हयसैन्धव सप्तयः । इत्यमरः । असुरम् असून् रिपु प्राणान् राति गृह्णातीति तत्। बुध्द्वा क्रूरं दुष्टं प्रेषितं प्रहितं, रावणेनेति शेषः । असहितपरबलं असहितं सहितुमशक्यं (?) परबलं शत्रुसैन्यं । प्रभूतात् बहुलात् । विजय भुजबलात् भुजयो बाह्वोर्बलं शौर्यम् । विजयं च तत् भुजबलं च विजय भुजबलम् । नि. ''जयोऽर्जुने च विजये'' । तस्मात् विजित्वा

In Public domain. Digitization Muthulakshmi Research Academy
संहृत्य, तत्र सिद्धाश्रमे तं विश्वामित्रं पूजयन् सन्, ब्राह्मणोक्तं ब्राह्मणेन विश्वामित्रेण उक्तं भाषितं सुवाचं शोभन गिरं मत्वा ज्ञात्वा । विचार्येत्यर्थः। उत्सवान्तं उत्कृष्टश्चासौ सवश्च उत्सवः यज्ञः तस्य अन्तं समाप्तिं चकार, हि अकरोत् खलु ॥

अन्यत्र - सुसहजसहितः बलरामसहितः, सुधीः विद्वान् । भान् प्रकाशमानः, स अच्युतः श्रीकृष्णः तत्र नन्दव्रजे अं विष्णुं मत्वा ध्यात्वा । नि. ''अकारो ब्रह्म विष्ण्वीश कमलेष्वङ्गणे गणे''। वाहाकारः केशिनामा यस्मिन् तत्(?) असुरः राक्षसः यस्मिन् तत् असुरम्। गंधर्वाणामश्वानामिन्द्रः श्रेष्ठः यस्मिन् तत् गन्धर्वेन्द्रं, मदेन गर्वेण सहित परबलं संयुक्तशत्रुसैन्यम्। नि. ''परं दूरान्यमुख्येषु परोऽरिपरमात्मनोः''। प्रभूतात् प्रचुरात् । नि.''प्रभूतं प्रचुरं व्याज्यमदभ्रं बहुलं बहु''। विजयभुजबलात् गतार्थं । विजित्वा खंडयित्वा चित्ररथरं चित्रं प्रकाशमानं रथं स्यन्दनं राति गृह्णातीति चित्ररथरम् । आनीतदिव्यरथमित्यर्थः । कंसप्रेषितं कंसप्रहितं अक्रूरं तदाख्यं कंसमन्त्रिणं पूजयन् ब्राह्मणोक्तं ब्राह्मणैः भूसुरैः उक्तं भाषितं सुवाचं शोभनवचनं यस्मिन् तत् (?)। उत्सवान्तं उत् उत्कृष्टस्य सवस्य कंसारब्धधनुर्यागस्य अन्तं समाप्तिं बुध्द्वा मत्वा चकार अकरोत् । कंसवधेन धनुर्यागसमाप्तिमचिन्तयदिति भावः ।

अन्यत्र - सुसहजसहिताः, सु पूज्याः सहजाः भीमार्जुननकुल-सहदेवाः तैः सहितः । नि. ''पूजनेस्विति''। ''सु पूजायां भृशार्थे च मतिकृच्छ्रसमृद्धिषु । इति विश्वः । सुधीः विद्वान् भान् प्रकाशमानः अच्युतः च्युतिरहितः स युधिष्ठिरः तत्र मार्गे मदेन संतोषेण गर्वेण च वाहाकारं पूर्ववत् व्याख्येयं । असहितपरबलं असहितं, सहितुमशक्यं

In Public domain. Digitization Muthulakshmi Research Academy
(?) परं मुख्यं बलं शक्तिः यस्य तम् । नि. ''परः श्रेष्ठारिदूरान्योत्तरे क्लीबन्तु केवले''। ''सैन्यास्थिरूपरेतः शक्तिस्थौल्येषु चेद्बलं क्लीबे । वाट्यालके स्त्रियां त्रिषु बलवति ना सीरि काक दैत्येषु'' ।(?) अंकः भूषणं यस्य तम् । (श्लोकेऽस्मिन् बहुत्र मत्वर्थीयं व्याख्यातमितिज्ञेयं (?)। नि. ''अङ्कस्थानेऽन्तिके मन्तौ रूपकोस्तंगलक्ष्मसु । नाटकादि-परिच्छदे चित्रयुद्धे च भूषणे'' । बुध्द्वा मत्वा क्रूरं दुष्टं, चित्ररथरम् । ''रा दाने'' । असुरं असून् वैरिप्राणान् राति गृह्णातीति असुरं गंधर्वेन्द्रं गन्धर्वश्रेष्ठं राजानं प्रभूतात् प्राज्यात्, विजयभुजबलात् विजयस्य अर्जुस्य भुजयोः बाह्वोर्बलाच्छक्तेः विजित्वा निर्जित्य ब्राह्मणोक्तं पथिक भूसुर कथितं, उत्सवान्तं उत्सवेन द्रौपदी विवाहविषयोत्स्ववेन अन्तं रम्यम् । नि. ''मह उद्धव उत्सवः''। सुवाचं शोभनगिरं मत्वा विचार्य तं गन्धर्वराजानं प्रेषितं स्वस्थानं प्रति प्रहितं चकार ॥

स्त्रग्धरावृत्तमेतल्लक्षणंतूक्तम् ॥

अव - श्रीरामः गंगां तीर्त्वा अहल्याशापविमोचनं कृत्वा शिवधनु-र्द्रष्टुकामोऽभूदिति, श्रीकृष्णः यमुनानदीं संतीर्य कंसारब्धं धनुर्यागं दिदृक्षुरभूदिति, युधिष्ठिरः जाह्नवीं तीर्त्वा द्रुपदेन कृतद्रौपदीविषय स्वयंवरमीक्षितुकामोऽभूदिति चाह -

26. गद्य - तदनंतरमसौ स बन्धुः स्वयोगजनदुष्कृतापहरां विभवभङ्गं स्फुरद्रामप्रभां हरितनयामतिक्रान्तः, विशालाश्रीरम्य सुमतिसंभावितः, सद्धीर हल्यानन्ददायकः, उद्भूतनयाधिकप्रमोदः, सज्जनक निवेदितभाव धर्मानुरक्तहृदयः, महर्षिचित्तप्रवर्तकतदाधिकं सारंभितोत्सवं द्रष्टुमयात् ॥ २६

In Public domain. Digitization Muthulakshmi Research Academy
तदनन्तरमिति - तदनन्तरं विश्वामित्रयागसंरक्षणानन्तरं सबन्धुः बन्धुरनुजोलक्ष्मणस्तेन सहितः । नि. ''बन्धुः स्यात्पुंसि बन्धूके मित्रे भ्रातरि बान्धवे''। असौ श्रीरामः स्वयोगजनदुष्कृतापहरां स्वस्य योगः ध्यानं तेन जनदुष्कृतं अपहरतीति तथोक्तां । उक्तं च -''गंगा गंगेति यो ब्रूयाद्योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति''। इति प्रमाणात् । नि. ''योगः सन्नहनोपायध्यानसंगतियुक्तिषु''। ''योगः सूत्रे द्रव्यलाभे विष्कंभादौ च भेषजे'' । इति शेषः । विभवभंगां वेः अनिलात् भवा उत्पन्नाः भंगाः तरंगाः यस्यां ताम् । नि. ''विश्वक्षुषि व्योम्नि वाते परमात्मनि पक्षिणि । इति विश्वः । नि.''भंगस्तरंग ऊर्मिर्वा स्त्रियां वीचिः'' इत्यमरः । स्फुरद्रामप्रभां स्फुरन्ती प्रकाशमाना रामा श्वेता प्रभा कान्तिर्यस्यां ताम् । नि. ''बले रामो नीलचारुसिते त्रिषु''। हरितनयां हरेः विष्णोस्तनयां पुत्रीं गंगामतिक्रन्तः अतीतः । नि.''यमानिलेन्द्र चन्द्रार्क विष्णुसिंहांशुवाजिषु । शुकाहि कपि भेकेषु हरिर्ना कपिलेत्रिषु''।। विशाला श्रीरम्यसुमतिसंभावितः विशालायामुज्जयिनीपुर्यां यः श्रीरम्यः श्रिया शोभया रम्यः, प्रकाशमानः सुमतिः तन्नामक इक्ष्वाकुवंशोद्भव राजा तेन संभावितः वन्दितः । नि. ''इन्द्र वारुण्युज्जयिन्योर्विशाला पृथुले त्रिषु ''। सद्धीः सती धीः यस्य । विद्वानिति यावत् । अहल्यायाः गौतमपत्न्या आनन्ददायकः सन्तोषप्रदः । उद्भूत नयाधिकप्रमोदः उत् उत्कृष्टः, भूतनयायां भूपुत्र्यां सीतायामधिकः विस्तृतः प्रमोदः प्रमुत् यस्य सः । सज्जनकनिवेदित भावधर्मानुरक्तहृदयः सता विदुषा जनकेन जनकचक्रवर्तिना निवेदितः ज्ञापितः भावः भवसंबंधी धर्मः चापः तस्मिन् अनुरक्तं आसक्तं हृदयं यस्य सः । नि. ''जनकौ

In Public domain. Digitization Muthulakshmi Research Academy
तातमैथिलौ''। नि. ''भावः सत्ता स्वभावाभिप्राय चेष्टात्मजन्मसु''। इत्यमरः। ''भावो बुधे विभूतौ च योनौलीलापदार्थयोः । रतिवेगे शब्दवृत्तिनिमित्तेरसबन्धिनि । विकल्पनादिषु प्राप्तौ जन्मन्यपि पुमान् भवेत् । भावः स्याद्भवसंबंधे भंभामवति च त्रिषु । इति शेषः । ''जन्म हरौ भवौ''। इत्यमरः । ''सत्ता संसारकल्याणप्राप्त्युपादा न भस्मसु, भवः''। इति शेषः । महर्षिचित्तप्रवर्तकः महर्षेः विश्वामित्रस्य चित्तं हृदयं तस्मिन् प्रवर्तकः नर्तकः तदा स्वयंवरकाले । अधिकं सारंभितोत्सवं अधिकं यदा भवति तथा आरंभितेन सह वर्तत इति सारंभितः (?) यः उत्सवः विवाहः तं द्रष्टुं अयात् इयाय ॥

अन्यत्र - तदनंतरं कंसारंभितधनुयोग समाप्ति विचारानन्तरं सबंधुः बलरामसहितः असौ श्रीकृष्णः । स्वयोगजनदुष्कृतापहरां स्वस्ययोगेन ध्यानेन स्नान संध्यावन्दनादि क्रियासंश्लेषेण जनदुष्कृतं नरकलुषं अपहरतीति तथोक्तां । विभवभंगां विशेषेण भवभंगां संसार-हारिणीं पुनर्जन्महारिणीं च । स्फुरद्रामप्रभा स्फुरन्ती प्रकाशमाना रामा नीला प्रभा यस्यास्तां। नि. ''रामो नीलचारुसिते त्रिषु''। हरितनयां कालिन्दीम् अतिक्रान्तः व्यतीतः। नि.''कालिन्दीसूर्यतनया यमुना शमनास्वसा''। इत्यमरः विशालाश्रीरम्यसुमतिसंभावितः विशालया श्रिया संपदा रम्याः प्रकाशमानाः सुमतयः शोभनहृदयास्तैः संभावितः वन्दितः। सद्धीरहल्यानन्ददायकः सद्धीरस्य हलिनः बलरामस्य आनंददायकः संतोषप्रदः । उद्धूतनयाधिकप्रमोदः उद्धूतेषु उत्कृष्टप्राणिषु नयेन नीत्या अधिकः पृथुलः प्रमोदः प्रीतिर्यस्य सः । यद्वा - उद्धूतनयेषु नीतिपरेषु

In Public domain. Digitization Muthulakshmi Research Academy
अधिकः प्रमोदः महान् सन्तोषः यस्य सः। नि.''नयो नीतौ द्यूतभेदे शास्त्रे च '' । सज्जनकनिवेदितभावधर्मानुरक्तहृदयः सते विदुषे जनकाय ताताय वसुदेवाय निवेदिते भावे अतिशये (?) धर्मे अनुरक्तम् आसक्तं हृदयं यस्य सः । महर्षिचित्तेषु प्रवर्तकः नर्तकः तदा तत्काले अधिकंसारंभितोत्स्वं अधिकं कंसारंभितं कंसकृतं उत्सवं धनुर्यागं द्रष्टुमयात् ।

अन्यत्र - तदनन्तरं द्रौपदी स्वयंवरदर्शनकामानन्तरं बन्धुभिः भीमार्जुन नकुलसहदेवैः सहितः सबन्धुः असौ युधिष्ठिरः स्वयोगजन-दुष्कृतापहरां स्वकीयध्यानेन जनकलुषनाशिनीं विभवभंगां वायुसंभूत तरंगां स्फुरद्रामप्रभां प्रकाशामानश्वेतकान्तिं हरितनयां गंगां अतिक्रान्तः व्यतीतः, विशालाश्रीरम्यसुमतिसंभावितः अधिकसंपत्प्रकाशमान सत्पुरुषसेव्यः सद्धीरहल्यानंददायकः, सद्धियं सद्बुद्धिं राति गच्छतीति तादृशः । हल्यानंददायकः अग्रजबलरामानंददायकः श्रीकृष्णः यस्य सः तथोक्तः । कृष्णं मनसा चिन्तयन्नित्यर्थः ।

उद्भूतनयाधिकप्रमोदः उद्भूतेषु उत् उत्कृष्टेषु भूतेषु प्राणिषु नयेषु नीतिषु च अधिकः प्रचुरः प्रमोदः संतोषः यस्य सः । प्राणिसंरक्षण न्यायप्रवर्तक इत्यर्थः । यद्वा - उत् उत्कृष्टेषु भूतेषु युक्तेषु सत्येषु च नयेषु शास्त्रेषु अधिकः प्रमोदः संतोषः यस्य सः । शास्त्रप्रवर्तक इत्यर्थः । नि. ''युक्ते क्ष्मादावृते भूतं प्राण्यतीते समे त्रिषु'' । इत्यमरः । सज्जनकः निवेदितभाव धर्मानुरक्तहृदयः सज्जना एव सज्जनकाः तैर्निवेदितः ज्ञपितः भावः अतिशयः यस्य तादृशे धर्मे आचारे अहिंसायां वा अनुरक्तहृदयः ।

In Public domain. Digitization Muthulakshmi Research Academy
सत्पुरुषोदितातिशयधर्मप्रवर्तकः इत्यर्थः । महर्षी अधिकसंतोषवान् चित्तप्रवर्तकः, स्वेच्छानुसारसंचारवानित्यर्थः । यद्वा- जनचित्तेषु संभावितवानित्यर्थः । तदा तत्काले अधिकं यथा तथा ? आरंभितं प्रारंभितं उत्सवं द्रौपदीस्वयंवरोत्सवं द्रष्टुमीक्षितुमयात् अगच्छत् ।

(''विशालाश्री'' इत्यत्र पुंवद्भावाभवः चिन्य एव ।)

अव - अथ रामकृष्णयुधिष्ठिराणां मिथिला मधुरा पांचालपुरी प्रवेशं कथयति -

27. सुयानादक्रूराद्वसुगणयुतां दीप्यजनका -
मतिक्रान्तो मार्गं गजतुरग पादातरथराम् ।
पुरीं सत्रैर्दीप्तां सबुधसुखदां प्रापमहतीं
सुमन्त्रैः कान्तां तां रिपुगणहरां धर्मजननः ॥ २७

सुयानादिति - अक्रूरात् सौम्यात् सुयानात् सुखसंचारात् । नि. ''गतिवाहनयोर्यानम् '' । मार्गम् अयनं । नि. ''अयनं वर्त्ममार्गाध्वपन्थानः पदवीसृतिः'' । अतिक्रान्तः व्यतीतः, धर्मजननः धर्मेण पुत्रकामेष्ट्या जननं यस्य सः । नि. ''धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ''। सः श्रीरामः वसुगणयुतां वसुगणैर्धनसमूहैः रत्नसमूहैश्च । नि. ''देव-भेदेऽनले रश्मौ वसू रत्ने धने वसु''। युतां युक्तां । दीप्यजनकां दीप्यः प्रकाशमानः जनकः राजा यस्यां ताम् । गजतुरगपादातरथान् कुंभि तुरग पदाति समूह स्यन्दनान् राति गृह्णातीति गजतुरंगपादातरथराम् । ''रा दाने'' सेनांग चतुष्टय संपन्नामित्यर्थः । सत्रैर्यज्ञैः नि. ''सत्रमाच्छादने यज्ञे सदा दाने वनेऽपि च'' ॥ दीप्तां प्रकाशमानां । विबुधसुखदां विबुधानां देवानां सुखं ददाति इति ताम् । नि. विबुधौ सुरपंडितौ ।

In Public domain. Digitization Muthulakshmi Research Academy
यज्ञा.... तिभिः देवान् संतुष्टहृदयवतश्च का ..... कान्तां रुचिराम् । नि. ..... रिपुगणहरां शत्रुचयनाशिनीं महतीमधिकां पुरीं मिथिलां प्राप ययौ ।।

अन्यत्र - अक्रूरात् धर्मजननः अक्रूरादानीतय धर्मजननः सम् । नि. ''अयनं वर्त्म मार्गाध्व पन्थानः पदवी सृतिः'' । अतिक्रान्तः व्यतीतः । धर्मजननः धर्मार्थमुत्पन्नः । ''परित्राणाय साधूनां विनाशाय च दुष्कृताम् । धर्मसंस्थापनार्थाय संभवामि युगे युगे ''।। इति भगवद्वचनप्रमाणात् सः श्रीकृष्णः वसुगणयुतां रश्मिसन्दोहसहितां । नि. ''देवभेदेऽनले रश्मौ वसूरत्नै धने वसु''। नि. ''वसुर्मयूखाग्नि धनाधिपेषु योकत्रे नृपेष्वेपि च देवभेदे । वृध्यौ वधास्थान धनेषु रत्ने वसुस्मृतं स्यान्मधुरेऽन्यवच्च''।। दीप्यजनकां दीप्यः प्रकाशमानः जनकः वसुदेवः यस्यां ताम् । गजतुरगपादातरथराम् सेनांगचतुष्ट्यधरां सत्रैः सदा दानैर्दीप्तां प्रकाशमानां विबुधसुखदां कोविदसंतोषप्रदां सुमन्त्रैः शोभनविचारैः कान्तां मनोहरां, रिपुगणहरां विपक्षसमूहनाशिनीं, महतीमधिकां पुरीं मधुरां प्राप ययौ ।।

अन्यत्र - अक्रूरात् अकठिनात् क्रूरो कठिनो न भवतीति अक्रूरः । नि. ''क्रूरौ कठिननिर्दयौ'' । सुयानात् सुखगत्याः मार्गं पन्थानमतिक्रन्तः व्यतीतः, धर्मजननः धर्मेण यमेन जननं यस्य सः धर्मजननः सः युधिष्ठिरः वसुगणयुतां वसुगणैर्देवसमूहैर्युतां संपन्नां, दीप्यजनकां दीप्याः प्रकाशमानाः जनकाः जनाः यस्यां ताम् । स्वार्थे कप्रत्ययः । गजतुरगपादातरथरां सेनांगचतुष्टयसंभृतां सत्रैर्दिव्यभवनैर्दीप्तां विराजमानां । यद्वा - सत्रैरुद्यानवनैर्दीप्ताम् । यद्वा - सत्रैः सुवर्णरजततन्तु संयोजितवस्त्रैर्दीप्ताम् । नि. ''सत्रमाच्छादने यज्ञे सदादाने वनेऽपि

In Public domain. Digitization Muthulakshmi Research Academy
च''।। विबुधसुखदां कविजनानंदप्रदायिनीं सुमन्त्रैर्गुप्तालोचनैः कान्तां मनोज्ञां मन्त्रशक्तिसंपन्नामित्यर्थः । रिपुगणहरां शत्रुसमूहनाशिनीं महतीं विशंकटां पुरीं पांचालनगरीं प्राप ययौ । शिखरिणीवृत्तमेतत् । लक्षणमुक्तम् ।।

अव : अथ रामस्य जानकीविवाहं, श्रीकृष्णस्य कंसहननेन वीरलक्ष्मी समाश्रयं, धर्मराजस्य द्रौपदीपरिणयं वर्णयति -

28. रौद्रं तत्र शरासनं विजयिना धाम्ना च लक्ष्यं मुदा,
कृत्वा श्रीमुखभेन भानुदवहल्लब्धांस्थिरानंदनाम् ।
कंसं भिद्य रिपून् सविन्नहृदयो कृष्णां सुवेणीं रमां
विच्छेदं पृथु सुंदरेण गुणसंयुक्तं विधायाच्युतः ।। २८

रौद्रमिति - श्रीमुखभेन ....भान् ..... खः मुख्यः भेनः भासा .... सूर्ये निशाकरे । स इव भा ..... चन्द्र इव सर्वलोका..... पुंसि कः कं शिरोऽम्बुनोः। कः ब्रह्मा .....कमिति विश्वप्रकाशः। विन्नं लब्धं हृदयं यस्य सः विन्नहृदयः, सदानन्दहृदय इत्यर्थः। नि. ''लब्धं प्राप्त विन्नं भावितमासादितं च भूतं च''। अच्युतः च्युतिरहितः, सः श्रीरामः विजयिना जैत्रेण धाम्ना प्रभावेन, तत्र मिथिलायां, लक्ष्यं लक्ष्यत इति लक्ष्यं दर्शनीयम् । ''लक्षदर्शनांकनयोः''। रौद्रं रुद्रसंबन्धि शरासनं कार्मुकं गुणसंयुक्तं मौर्वीसंधानं कृत्वा संभिद्य, भित्वा रिपूंश्च विच्छेदं विधाय लब्धां प्राप्तां कृष्णां नीलां नि.''व्यासार्जुनाग्नि हरि कोकिलकाकशूद्र तामिस्त्रपक्ष करि नीलगुणेषु कृष्णः । द्रव्ये त्रिषु द्रुपदजा तटिनीकणा च कृष्णाऽध मोहमरिचे दुरितं च कृष्णम्''।। नि. कृष्णे नीलासितश्यामकालश्यामलमेचकाः'' । इत्यमरः । सुवेणीं शोभन प्रवेणीं पृथुसुंदरेण विशालसौन्दर्येण रमां लक्ष्मीं स्थिरानंदनां स्थिरायाः भुवः नन्दनां तनयां सीताम् । नि. ''भूर्भूमिरचलनन्तरसा विश्वंभरास्थिरा''

In Public domain. Digitization Muthulakshmi Research Academy
इत्यमरः । मुदा संतोषेण, उदवहत् उदूढवान् ।।

अन्यत्र - श्रीमुखभेन भानुत् श्रिया शोभया मुखः मुख्यः भेनः सूर्यः तस्य भां कान्तिं नुदति वारयतीति नुत् । ''दिविसूर्यसहस्त्रस्य भवेद्युगपदुत्थिता । यदि भा सदृशी वा स्यात् भासस्तस्य महात्मनः''। इति भगवद्गीतायां उक्तत्वात् । निजकान्त्या सूर्यकान्तिं तिरस्कृतवानित्यर्थः। भानां भासां इनः प्रभुः भेनः सूर्यः । नि. ''स्युः, प्रभारुगृचिस्त्विङ्भा भाश्च विद्युति दीप्तयः'' इत्यमरः । मुदा संतोषेण विन्नहृदयः, विन्नं प्राप्तं हृदयं यस्य सः । हर्षाविभिन्न सुखलब्ध..... अच्युतः श्रीकृष्णः विजयिना जैत्रेण धाम्ना ..... रायां लक्ष्मं ..... य्य ..... ग कल्पितमित्यर्थः । शरासन ..... विधाय विच्छेदं शिथिलं कृत्वा कंसं तन्नामा ..... संहृत्य । कृष्णां नीलां ..... सौन्दर्येण, लब्धां प्राप्तां ..... स्थिरां शाश्वितां आनंदनामानन्दकरीं रमां राज्यलक्ष्मीं वीरलक्ष्मीं वा अवहत् उवाह । कंसं हत्वा राज्यश्रियं लब्धवानित्यर्थः ।।

अन्यत्र - श्रीमुखभेनभान् श्रिया शोभया युक्तं मुखं आननं श्रीमुखं तेन भेनश्चन्द्र इव भान् दीप्यमानः। चन्द्रसदृशमुखवानित्यर्थः। कं ब्रह्माणं, विन्नहृदयः, विन्नं प्राप्तं हृदयं यस्य सः ब्रह्मा निवेशितचित्त इत्यर्थः। अच्युतः च्युतिरहितः स युधिष्ठिरः। तत्र पांचालपट्टणे विजयिना अर्जुनेन रौद्रं घोरम् । नि. ''रौद्रो रसान्तरे घोरे रुद्रसंबन्धिनि त्रिषु'' ।। शरासनं चापं गुणसंयुक्तं ज्यासहितं विधाय लक्ष्यं शरव्यं, द्रुपदेन कन्याशुल्कीकृत शरव्यम् । मत्स्ययंत्रमित्यर्थः । संभिद्य विदार्य धाम्ना प्रभावेन रिपून् वैरिणः विच्छेदं कृत्वा लब्धां प्राप्तां सुवेणीं शोभन प्रवेणीम् पृथुसुंदरेण अधिकसौन्दर्येण रमां लक्ष्मीं, स्थिरानन्दनां अचल

In Public domain. Digitization Muthulakshmi Research Academy

हर्षकरीम् यद्वा-स्थिरां शाश्वितां आनन्दनां आ समन्तान्नन्दनां हर्षकरीम्। नि. ''नंदनं वासवोद्याने सुते हर्षकरे त्रिषु''। कृष्णां द्रौपदीं मुदा संतोषेण उदवहत् उदूहे ।। वृत्तन्तु शार्दूलविक्रीडितम् । लक्षणंतूक्तम्।

अव - अथ लक्ष्मणादीनां त्रयाणां पाणिग्रहणं,
श्रीकृष्णस्य ज्ञाति जनान्दनत्वं, भीमादीनां
चतुर्णामुद्वाह प्रकारं च विशदयति -

29. गद्य - तदनन्तरमसौ क्रमेण कल्याणलब्धैः
सप्रमदैः स्वैः सोदरैरर्चितः सन् रराज ।। २९

तदनन्तरमिति - तदनन्तरं सीतादिविवाहानन्तरं क्रमेण रीत्या कल्याणलब्धैर्विवाहप्राप्तैः सप्रमदैरूर्मिला माण्डवी श्रुतकीर्ति नाम्नीभिः सहितैः । नि. ''प्रमदा मानिनी कान्ता'' इत्यमरः । स्वैः स्वकीयैः सोदरैः भ्रातृभिः लक्ष्मणभरतशत्रुघ्नैरर्चितः पूजितः सन् असौ श्रीरामः रराज बभासे ।

अन्यत्र - तदनन्तरं कंसवधानन्तरं कल्याणलब्धैः शुभप्राप्तैः सुवर्णलब्धैश्च । नि.''स्यात् कल्याणं सुवर्णेऽपि मंग ..... । अभयैः समदैः सस्त्रीकैः स्वैः ज्ञा .....। नि. ''स्वोज्ञाता वर्तमनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने''।''..... काशे शर्मणि चेति शेषः ।।..... रराज बभासे ।।

अन्यत्र - तदनन्तरं ..... क्रमेण रीत्या कल्याणलब्धै र्विवाहोत्सवप्राप्तैः सप्रमदैः प्रमदया दौपद्या सहितैः । स्वैः निजैः सौदरैः अनुजैर्भीमार्जुननकुलसहदेवैरर्चितः पूजितः सन् असौ युधिष्ठिरः रराज बभासे ।।

In Public domain. Digitization Muthulakshmi Research Academy
अव - श्रीरामः दशरथं प्रणम्य सीतामुदूह्य अयोध्यां प्रति प्रस्थितः सन् मार्गे स्वजिगीषया समागतं परशुराममभिभवति स्म । श्री कृष्णः कंसनिर्बन्धेन दुःखव्याकुलचित्तं स्वामातामहमुग्रसेनं पट्टाभिषिक्त-मकरोदिति, युधिष्ठिरः द्रौपदीं परिणीय प्रस्थानसमये युद्धाय समापतंतं दुर्योधनं विजिग्ये - इति प्रदर्शयति -

30. निःशक्तिमन्तं सहसा गृहीत्वा
रामं सचापं नमितः सबाणम् ।
तमुग्रसेनं धृतराष्ट्रजातं
कुरुं प्रणम्याथ प्रभुं चकार ॥ ३०

निःशक्तिमन्तमिति - अथ अनन्तरं नमितः अमितः न इत्यस्य न शब्दस्य सुप्सुपेति समासः । अपरिमेय इत्यर्थः । सः श्रीरामः । उग्रसेनं उग्राः दारुणाः सेनाः चम्वः यस्य तम् । नि. ''उग्रः शूद्रासुते क्षत्राद्रुदे ना दारुणे त्रिषु''॥ धुतराष्ट्रजातं राष्ट्रानां राज्यानां जातं समूहः, धृतं राष्ट्रजातं यस्य तं । प्रभुं प्रभवति समर्थो भवतीति प्रभुः तं, ''भूसत्तायाम्'' । तं गुरुं तातं दशरथम् । नि.''गुरुर्गीष्पतिपित्रादौ'' इति। ''उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः । मातुलः श्वशुरस्त्राता मातामहपितामहौ । वर्णज्येष्ठः पितृव्यश्च पुमांसो गुरवः स्मृताः''॥ ''माता मातामही गुर्वी पितुर्मातुश्च सोदरी । श्वश्रूः पितामही ज्येष्ठा भगिनी गुरवस्त्रिय'' इति शेषः ॥ प्रणम्य अभिवाद्य चापं परशुरामदत्त नारायणीयं धनुः सबाणं सशरं गृहीत्वा संगृह्य, तत्र शरं संधायेति यावत् । ..... सहसा आशु निःशक्तिमन्तं निर्गतबलवन्तं ..... र्या मुत्साहादौ बले स्त्रियां'' । ..... चकार अकरोत् । परशु ..... ॥

In Public domain. Digitization Muthulakshmi Research Academy

युधिष्ठिरपक्षे - अन्यत्र - अथ अनन्तरं सः युधिष्ठिरः । रामं .... ति धातुभ्यां शाश्वितमित्य ..... मं बलरामं च । प्रणम्य अभिवाद्य । मनसा ध्यात्वेत्यर्थः । इतः पांचालपट्टणे आपन्नम् आगतम् । नि. ''आपन्नः प्राप्तसापदोः''। सबाणं बाणैः सहितम् । दिव्यबाण संपन्नमित्यर्थः। गुरुं अलधुं उग्रसेनं उग्रस्य हरस्य सेनेव सेना यस्य तं प्रभुं राजानं च, धृतराष्ट्रजातं धृतराष्ट्र ..... निः शक्तिमन्तं निर्गतबलवन्तं चकार अकरोत् । दुर्योधनं निस्त्राणं चकारेत्यर्थः ।

श्रीकृष्णपक्षे - अन्यत्र - अथ अनन्तरं सः श्रीकुष्णः धृतराष्ट्र जातं धृतं राष्ट्रजातं राज्यसमूहो यस्य तं गुरुं भ्रातरं तं बलरामं प्रणम्य अभिवाद्य, आपन्नमापद्गतं, सबाणमार्तध्वनिसंयुतं, दुःख सहितमित्यर्थः । कंसेनेति शेषः । ''वणतीति बाणः''। ''वणक्वणशब्दे''। उग्रसेनं तदाख्यं मातामहं गृहीत्वा अभिगम्य, निगलबन्धनान्मो-चयित्वेत्यर्थः। इतः मधुरायां निःशक्तिमन्तं नितरां बलवन्तम् । तेजोवन्तमित्यर्थः । प्रभुं च राजानं च सहसा आशु चकार चक्रे ।। वृत्तमुपजातिः । इन्द्रोपेन्द्रवज्रामिश्रणात् । लक्षणंतु ''स्यादिन्द्रवज्र यदि तौ जगौ गः'' इति । उपेन्द्रवज्रा जतजाश्चगोगः'' इति ।।

अव - अथ श्रीरामः सीतालक्ष्मणभरतशत्रुघ्नबन्धुजनैः, साकं अयोध्यां प्राप्य दशरथस्यानन्दमुत्पादयन् स्वमंदिरे समवात्सीदिति । श्रीकृष्णः अवन्तीनगरमेत्य सान्दीपनिमाचार्यमशिश्रियत् इति । युधिष्ठिरः अनुजैः साकं हस्तिनापुरीमधिगम्य धृतराष्ट्र प्रियंकरः सन्नवसदिति च स्पष्टयति ।

In Public domain. Digitization Muthulakshmi Research Academy

31. रामानुजः सहित बन्धुजनः प्रकुर्वन्
तां भासुरां गजपुरीं रुचिरामयोध्याम् ।
हर्षं गुरोर्नश्वरैर्न्यवसत्प्रभूतां
सोऽसौ गतोऽथ भवने धनिकामवन्तीम् । ३१

रामानुज इति - अथ परशुरामपराभवानन्तरं रामानुजः रामाः मनोहरा अनुजाः लक्ष्मणभरतशत्रुघ्नाः यस्य सः । यद्वा - रामाभिः ऊर्मिला माण्डवीश्रुतकीर्ति नाम स्त्रीभिः युक्ताः अनुजाः लक्ष्माणादयः यस्य सः । नि. ''रामः पशुविशेषे स्याज्ज्ञामदग्न्ये हलायुधे । राघवे चासितश्वेत मनोज्ञेषु च वाच्यवत्''।।''सुन्दरीरमणी रामा'' इति चामरः। यद्वा - राति प्रकाशते इति 'रा' । रा च सा मा लक्ष्मीः । सीतेति भावः। अनुजाः लक्ष्मणादयः यस्य सः । ''राजृदीप्तौ''। सहितः ..... संगताः बन्धुजनाः ..... असौ श्रीरामः भासुरा ..... प्रकाशमानः अंगजः मन्मथः तेन पुरीं ..... पालन पूरणयोः । ..... जभिः अवन्तीं रक्षन्तीं धनिकां ..... रुचिरां सुन्दरां नामयोध्यां साकेत नामपुरीं गतः प्राप्तः । गुरोः पितुः दशरथस्य हर्षं संतोषं प्रकुर्वन् रचयन् भवने मन्दिरे न्यवसत् उवास ।

अन्यत्र - अथ उग्रसेनपट्टाभिषेकानन्तरं सहित बन्धुजनः हिताः इष्टाः बन्धुजनाः बान्धवजनाः हिताश्च ते बन्धुजानाश्च हितबन्धुजनाः, हितबन्धुजनैः सह स्थितः सहितबन्धुजनः । सः पूर्वोक्तः । असौ रामानुजः, रामस्य बलरामस्य अनुजः श्रीकृष्णः भासुरां प्रकाशमानाम् नश्वरैर्नरश्रेष्ठैः रुचिरां सुन्दरां अयोध्यां अजय्यामंगजपुरीम् । अगजस्य मन्मथस्य पुरीपालनं यस्यास्ताम् । युवजनपरिपूर्णामितिभावः ।

In Public domain. Digitization Muthulakshmi Research Academy

श्लोकेस्मिन् ''भासुरांगजपुरीं'' इत्यत्र भासुरामिति छेदे 'गजपुरीं' इत्येव, नत्वंगजपुरीं भवति । चिन्त्यमेतत् व्याख्यानम् ।। (के.वि.राघवाचार्यः)

प्रभूतां बहुलां तामवन्तीं अवन्तीनाम उज्जयितनीपुरीं गंतः प्राप्तः गुरोः आचार्यस्य सांदीपनेः भवने मन्दिरे हर्षं गुरुशुश्रूषया संतोषं प्रकुर्वन् रचयन् न्यवसत् उवास । विद्याप्राप्तवानित्यर्थः ।

अन्यत्र - अथ पांचालपुराद्रामानुजः राः धनानि तेषां मा संपत् तया धनसंपदा युक्ताः अनुजाः भीमार्जुननकुलसहदेवाः यस्य सः । यद्वा - रामा स्त्री द्रौपदी । नि. ''सुन्दरी रमणी रामा'' इत्यमरः । अनुजाः भीमादयः यस्य सः । नि. ''राः स्त्रियां होमशालायामारांसायां गतावपि। राः पुमान् पावके हेम्नि समर्थातिशये बले ।। इति च । सहितबन्धुजनः हितबन्धुजनेन सह वर्तत इति सहित बन्धुजनः, सः असौ युधिष्ठिरः नश्वरैर्नरश्रेष्ठैः राजभिः विद्वद्भिश्च अवंतीं रक्षन्तीम् । नि. ''वरो जामातरि वृत्तौ देवतादेरभीप्सिते । षिड्गे पुंसि त्रिषु श्रेष्ठे कुंकुमे तु नपुंसकम् । मनाक् प्रिये वरं क्लीबं केचिदाहुस्तदव्ययम्'' ।। धविकां अ..... योद्धुमशक्थां रुचिरां मनोहरां भासुरां प्रकाशमानां तां गजपुरीं हस्तिनापुरीं गतः प्राप्तः गुरोः पितृव्यस्य धृतराष्ट्रस्य । नि. ..... चैव महीपतिः मात ..... पितामहौ । वर्णज्येष्ठपितृव्यश्च पुमाँसो गुरवस्स्मृताः । माता मातामही गुर्वी पितुर्मातुश्च सोदराः । श्वश्रूः पितामही ज्येष्ठभगिनी गुरवः स्त्रियः'' । इति ।''दुर्भरालघुनोर्दीर्घसंयुक्तपरयो र्गुरु'' रिति शेषः ।। हर्षं संतोषं प्रकुर्वन् सन् रचयन् सन् भवने मन्दिरे न्यवसदुवास ।

In Public domain. Digitization Muthulakshmi Research Academy
वसन्ततिलकावृत्तम् । ''उक्ता वसन्ततिलका तभजा जगौ गः'' इति लक्षणात् ॥

अव - श्रीरामः दशरथस्य संतोषं कुर्वन् यशःप्राप, श्रीकृष्णः विद्यामधीत्य मृतपुत्रसमर्पणया आचार्य मनोरथं निर्वर्त्य गुरुकुलात् प्रतिनिवृत्तो मधुरां लेभे । युधिष्ठिरः धृतराष्ट्रस्य प्रमोदं कुर्वन् समज्ञामगमदिति च, - विशदयति -

32. गुरोः कुमारं विद्याज्ञो
लेभे कीर्तिं गुणैः प्रदः ।
भासा पराक्रमेणासौ
हर्षं सन्मधुरां जितः ॥ ३२

गुरोरिति - विद्यां जानातीति विद्याज्ञः । सर्वज्ञ इत्यर्थः । भासा कान्त्या कुमारं मन्मथम् । नि.''कुमारो मन्मथे स्कन्दे युवरा ..... वाचके । बाले वरणवृक्षे च द्वीपे सत् (पुं) नपुंसकम्''॥ जितः जैत्रः पराक्रमेण प्रतापेन गुणैः शौर्यौदार्यदयादिभिश्च गुरोस्तातस्य दशरथस्य हर्षं संतोषं प्रदः सन् दत्तः सन् असौ श्रीरामः मधुरां मनोज्ञाम् । नि.''मधुरो ना रसे तद्वत् सुन्दर स्वादुषु त्रिषु । मधुरा शीतपुष्पा च कथ्यते मधुपुर्यपि'' । कीर्तिं यशः लेभे प्राप ॥

अन्यत्र - गुणैः सौजन्य-सौलभ्य-गांभीर्य-शुश्रूषादिभिः, विद्याज्ञः विद्यां सर्वविद्यां जानातीति विद्याज्ञः । चतुःषष्टि कलापारीण इत्यर्थः। पराक्रमेण जितः जैत्रः आचार्य पुत्रहन्तारं पंचजनासुरमिति शेषः।

In Public domain. Digitization Muthulakshmi Research Academy

''कृष्णः आचार्येण प्रभासतीर्थस्नानाय गतं निजपुत्रं समुद्रेणापहृतं दक्षिणां देहीति उक्तः सन् समुद्रं गत्वा समुद्रेण निवेदितं गुरुसुतहर्तारं पंचजनासुरं संहृत्य तदुदरे तमदृष्ट्वा, तदंगसंभवं पांचजन्यं गृहीत्वा संयमिनी नगरमेत्यापूरयति भगवति श्रीकृष्णे शंखरवाकर्णन समनंतरमेव गुरुपुत्रसमर्पणेन यमेन पूजित'' इति भागवती कथा ..... श्रीकृष्णः गुरोः सांदीपनेः ..... मृतपुत्रं, कीर्तिं, यशः, हर्षं, संतोषं ..... भासा कान्त्या मधुरां मधुरानाम .....

विद्यादि शास्त्रज्ञः पराक्रमेण ..... युधिष्ठिरः गुणैः शौर्यौ-दार्यदयादिभिः गुरोः पितृव्यस्य धृतराष्ट्रस्य हर्षं संतोषं प्रदः दत्तः सन् भासा कान्त्या मधुरां सुन्दरां कीर्तिं समज्ञां लेभे अलभत ॥

अव - श्रीरामः अयोध्यां प्रकाशमानां चक्रे-इति,

श्रीकृष्णः द्वारकां प्रभायुक्तामकरोदिति,

युधिष्ठिरः इन्द्रप्रस्थपुरीं देदीप्यमानां चकारेति च विशिनष्टि

33. गद्य - द्वारकांचितेन्द्रप्रस्थलसद्विख्याताभिख्या । रुचिरा परायोध्येति पुरी रराजामुना ॥ ३३

द्वारकेति - द्वारकांचिता द्वार एव द्वारकः । स्वार्थे कप् । द्वारकैः प्रतीहारैः अंचिता पूजिता । इन्द्रप्रस्थलसद्विख्याताभिख्या रुचिरा । स्थलं स्थानं प्रकर्षं च तत् स्थलं च प्रस्थलं, इन्द्रस्य सहस्राक्षस्य प्रस्थलं स्थानं स्वर्गं इन्द्रप्रस्थलमिव नाक इव सती श्रेष्ठा विख्याता प्रसिद्धा अभिख्या शोभा तया रुचिरा मनोहरा । परा श्रेष्ठा अयोध्या इति पुरी साकेतपुरं अमुना श्रीरामेण रराज बभासे ॥

In Public domain. Digitization Muthulakshmi Research Academy

अन्यत्र - इन्द्रप्रस्थलसद्विख्याताभिख्या रुचिरा, स्वर्ग इव श्रेष्ठा प्रथिता शोभा सुन्दरा । परायोध्या परैः शत्रुभिः अयोध्या योध्दुमशक्या, अंचिता पूजिता द्वारका द्वारकानाम पुरी, अमुना श्रीकुष्णेन रराज विरेजे । जरासन्धभयाद्विश्वकर्मणा मध्ये समुद्रं द्वारकां निर्माय स्वजनै-र्भगवानध्युवसेति भावः ॥

अन्यत्र - परायोध्या परैः शत्रुभिः अयोध्या अजय्या, द्वारकांचिता द्वारकैः प्रतीहारैः । नि. ''द्वर्द्वारं प्रतीहार'' इत्यमरः । अंचिता पूजिता। इन्द्रप्रस्थलसद्विख्याताभिख्या रुचिरा, इन्द्रप्रस्थं इति लसती राजती विख्याता प्रथिता अभिख्या नाम तया रुचिरा मनोहरा पुरी अमुना युधिष्ठिरेण रराज शुशुभे । अर्धराज्याभिषिक्तो युधिष्ठिरो धृतराष्ट्रानुमत्या इन्द्रप्रस्थं जगामेति भावः ॥

अव - श्रीरामस्य ..... युधिष्ठिरस्य स्वकीयानुजप्रतापेन दि ..... श्रीकृष्णस्य भौष्मीपरिणयं च विशिनष्ठि -

34. श्री भीष्मसूनु संयोगो । विवाहं लब्धवांश्च सः ।
जिताशः सक्षमां प्राप्तो बलयुक्तो सुरार्चितः ॥ ३४

श्रीरिति - विवाहं विः पक्षी ..... गरुड इत्यर्थः । वाहः अश्वः गरुडतुरगः । नि. ''विश्वक्षुषि व्योम्निावाते परमात्मनि पक्षिणि'' इति विश्वः । नि. ''वाजिवाहार्वगंधर्व हयसैंधव सप्तयः'' इत्यमरः । गरुडवाहनमित्यर्थः । तं लब्धवान् प्राप्तवान् बलयुक्तः बलेन पराक्रमेण युक्तः संयुतः । सुरार्चितः सुरन्तीति सुराः । ऐश्वर्यशालिनः । सुर ऐश्वर्ये। सुष्ठु राजन्त इति वा सुराः । ''राजृदीप्तौ'' । ब्रह्मविष्णुमहेशाः ।

In Public domain. Digitization Muthulakshmi Research Academy
तैरर्चितः पूजितः । यद्वा - असुरार्चितः असुरैः प्रह्लादादिभिः अर्चितः पूजितः । श्री भीष्मसूनुसंयोगः श्रीः संपद्युक्ताः, भीष्माः भयंकराः । शत्रूणामिति शेषः । सूनवः अनुजाः लक्ष्मणादयः । नि. ''सूनुः पुत्रेऽनुजे रवौ''। तैः संयोगः संगतः । जिताशः जिता आशा कांक्षा येन सः । निष्काम इत्यर्थः । सः श्रीरामः । क्षमां क्षान्तिं प्राप्नोत् आयात् ।

अन्यत्र - बलयुक्तः बलेन बलरामेण युक्तः मिलितः, सुरार्चितः सुरदेवैरर्चितः पूजितः, जिताशः जिताः आशाः दिशश्च येन सः । श्री भीष्मसूनुसंयोगः श्रीः शोभायुक्तः भीष्मः विदर्भाधिपः तस्य सूनुः पुत्री रुक्मिणी तया संयोगः मिलितश्च । सः श्रीकृष्णः,..... विवाहं परिणयं लब्धवान् प्राप्तवान् । क्षमां निजभूमिं । द्वारकामित्यर्थः । प्राप्नोत् आयात् ॥

अन्यत्र - बलयुक्तः बलेन शक्त्या युक्तः संयुतः श्री भीष्म सूनुसंयोगः श्रीः शोभायुक्ताः, भीष्माः भयंकराः द्विषामिति शेषः । नि. ''भीषणे त्रिषु भीष्मः स्यात् रुद्रगांगेययोस्तु ना'' । सूनवः अनुजाः भीमार्जुननकुलसहदेवाः । तैः संयोगः संसक्तश्च । विवाहं, वहति नरं वाहः । ''वह प्रापणे'' । वाहाः रथाश्वगजादयः । विशेषेण वाहं अश्वादिं, लब्धवान् प्राप्तवान् । सुरार्चितः, शुभं रान्ति ब्रुवंतीति सुराः । सत्पुरुषाः, तैरर्चितः पूजितः । ''रै शब्दे'' । जिताशः जिताः आशाः दिशः यस्य सः । सः युधिष्ठिरः, क्षमां क्षोणीं प्राप्नोत् आयात् । लब्धवानित्यर्थः । राजसूयाध्वरानुष्ठानाय सोदरैः सर्वं वसुन्धरामजैषीदिति भावः ॥

अवतारिका - श्रीरामः कैकेयीवरप्रदानेन व्याकुलचित्तनिज जनकवचनं सफलं कर्तुं सीतालक्ष्मणाभ्यां साकमरण्यं प्रतस्थे - इति,

In Public domain. Digitization Muthulakshmi Research Academy
श्रीकृष्णः नरकासुरसहरणायेन्द्रप्रार्थनया प्राग्ज्योतिषं प्रति प्रतस्थे- इति, युधिष्ठिरः दुर्योधन कैतवा ..... पत्नीत्रन् भार्यसोदरै स्समं वनमवजगामेति ..... ॥

35. गद्य - अथ स सामानुजोऽयं सुबलजातभार्या वरदेन मही सूनुधामापहृत परश्रिया गुरुणावनार्थेऽभिहितः पट्टणादगच्छत्॥ ३५

अथेति - अथ अभिषेकसंभारसज्जीकरणानन्तरं सरामानुजः रामास्त्री सीता, अनुजः लक्ष्मणः, रामा चानुजश्च रामानुजौ, ताभ्यां सहितः सरामानुजः । मही नित्योत्सववान् । नि. ''मह उत्सव तेजसोः''। सूनुधामापहृतपरश्रिया सूनुः सूर्यः, तस्य धाम रश्मिः, तदिव धाम रश्मिः, तेनापहृता गृहीता परश्रीः शत्रुशोभा यस्य तेन । पराक्रमेण जितशत्रुगण इत्यर्थः । नि. ''सूनुः पुत्रेऽनुजे रवौ'' । सुबलजातभार्या वरदेन सुबलं शोभनशक्तिः, तस्य जातं समूहः यस्याः सा तादृशी भार्या पत्नी कैकेयी, तस्याः वरदेन वरप्रदानेन । देवासुरयुध्दे कृत सारथ्यायाः कैकेय्याः वरप्रदानहेतुनेति भावः । गुरुणा पित्रा दशरथेन अभिहितः उक्तः, अयं श्रीरामः, वनार्थे वनप्रयोजने । चतुर्दशसंवत्सरवन वासार्थमिति यावत् । पट्टणात् अयोध्यायाः अगच्छत् अयात् ।

अपरत्र - अथ अनंतरं सुबलजातभार्यावरदेन सुबलेन शोभनरूपेण जाता उत्पन्ना भार्या पत्नी शचीदेवी तस्याः वरदेन इष्टवस्तु प्रदानेन, तस्याः पतित्वादभीष्टप्रद इति यावत् । यद्वा - सुबलेन शोभन बलेन जाताः उत्पन्नाः भार्याः भृत्याः, देवादि मनुष्याः । भर्तुं पोषितुं योग्याः भार्याः । ''भृञ् धारणपोषणयोरिति धातुः'' । तेषां वरदः अभीष्टप्रदः । निर्दिष्टकार्यकरणानंतरं पारितोषिकवेतनादि द्रव्यप्रदानेन

In Public domain. Digitization Muthulakshmi Research Academy

सन्मानेन च आनंदकर इत्यर्थः । नि. बलं गन्ध रसे रूपे स्थार्मानस्थौल्य सैन्ययोः । पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च ।। ''बलयुक्तेऽन्य-लिंगं स्यात् बलावाट्यलकेऽस्त्रियाम् । महीसूनुधामापहृतपरश्रिया मह्याः भूम्याः सूनुः पुत्रः नरकासुरः, तस्य धाम प्रभावः, तेन अपहृता गृहीता परा मुख्या श्रीः संपत् यस्य तेन, गुरुणा भ्रात्रा देवेन्द्रेण अभिहितः प्रार्थितः, सः पूर्वोक्तः, अयं रामानुजः रामस्य बलरामस्य अनुजः कृष्णः, अवनार्थे रक्षण प्रयोजने पट्टणात् ..... अगच्छत् निरगात् ।।

अन्यत्र - अथ राजसूययागानन्तरं सुबलजातभार्यावरदेन सुबलस्य सुबल नामधेयस्य राज्ञः, जाता भार्या पत्नी गांधारी तस्याः वरदेन अभीप्सित वस्तु प्रदानेन पतिव्रतायाः गांधार्याः मनोभीष्टप्रद इत्यर्थः । सूनुधामापहृतपरश्रिया सूनुः पुत्रः दुर्योधनः, तस्य धाम्ना कैतवप्रभावेन अपहृता गृहीता परा मुख्या श्रीः युधिष्ठिर संपत् यस्य तेन, गुरुणा पितृव्येन धृतराष्ट्रेण अभिहितः उक्तः, मही महः तेजः अस्यास्तीति मही (?) तेजस्वीति यावत् । नि. ''मह उत्सव तेजसाः''। स रामानुजः रामा द्रौपदी, अनुजाः भीमादयः, तैः सहितः स रामानुजः। अयं युधिष्ठिरः पट्टणात् हस्तिनापुर्याः वनार्थे अरण्य- विषये अगच्छदयतेस्म ।।

अव - कृत सायं संध्योपास्ते रामस्य प्रथमदिने रात्रौ तमसानदीतीरे निवासं, कृष्णेन मुरपाशादि दुर्गलक्षणनाशपूर्वकं नरकासुरं हत्वा तद्बन्दीकृत षोडशसहस्त्रस्त्री समागमं, युधिष्ठिरस्य स्वानुगतब्राह्मण समूहसंरक्षणकृते सूर्योपास्तिं च विशिनष्टि -

36. सत्याकरोल्लसितविग्रह भासमानो

प्राग्ज्योतिषे नरकसंहरणो स वासी ।

CC-0. In Public domain. Digitization Muthulakshmi Research Academy

कंदोऽग्रजन्मनि वहे तमसा वनेय -

मंते दिनस्य प्रमदावलि संगतोऽभूत् ॥ ३६

सत्याकर इति - सत्याकरोल्लसितविग्रहभासमानः सत्यस्य तथ्यस्य, आकरः निलयः, उल्लसितः प्रकाशितः, विग्रहः देहः, तेन भासमानः देदीप्यमानः । सत्यस्वरूपवानित्यर्थः । ''सत्येन लोकान् जयति दीनान् दानेन राघवः । इति प्रमाणात् । नि. ''सत्यं शपथतथ्ययोः''। इत्यमरः । नि. ''शरीरं वर्ष्म विग्रहः''। इत्यमरः । नरकसंहरणः निरयनाशकः । नि. ''नरके निरयेऽसुरे'' ।

प्रमदावलिसंगतः संतोषसमुदाययुक्तः । नि. ''गर्वे मुदे च गंधे च प्रमदः प्रमदास्त्रियाम्''। सः पूर्वोक्तः अयं श्रीरामः, दिनस्य दिवसस्य अंते सायंकाले, अग्रजन्मनि वहे, अग्रजन्मानः श्रेष्ठजन्मानः ऋषयः । नि. ''अग्रं प्रा ...हरं श्रेष्ठं मुख्यं वर्यं प्रबर्हण'' मित्यमरे त्रिकांडशेषः । तेषां निवहः समूहः यस्मिन् तस्मिन् तमसा वने तमसानदी विपिने । यद्वा - तमसावने तमसा जले । तत्तीरे इति यावत् । ज्योतिषे सूर्याय । नि. ''ज्योतिर्नाग्न्यर्कचन्द्रेषु क्लीबं खद्योतदृष्टिषु''॥ कंदः कं ददातीति कन्दः । अर्घ्यप्रदः सन् वासी निवासी, अभूत आसीत्॥

अन्यत्र - सत्याकरोल्लसितविग्रहभासमानः सत्यायाः सत्यभामायाः कराभ्यां बाहुभ्यामुल्लसितः प्रकाशितः विग्रहः रणः, तस्मिन् भासमानः । सत्यभामोल्लासकरयुद्धसन्तुष्ट इत्यर्थः । प्राग्ज्योतिषे तदाख्ये भौमपुरे । नि.''प्राग्ज्योतिषं काम ..... म पु रः विदुः । नरकसंहरणः नरकासुसंहारकः । कं सुखं ददातीति कन्दः । लोकानामिति शेषः । यद्वा - कं सुखं द्यति खण्डयतीति कन्दः । शत्रूणामिति शेषः । नि. मूर्ध्नि

In Public domain. Digitization Muthulakshmi Research Academy
चित्ते जले काये सुखे ब्रह्मणि मारुते । कामे फले सुवर्णे च कः शब्दो द्रविणावपि''। ''दोऽवखण्डने'' इति धातुः। सः अयं श्रीकृष्णः । अतमसा अतमोगुणेन, सत्वगुणेनेति यावत्। अग्रजन्मनिवहे अग्राणि श्रेष्ठानि जन्मानि यासां ताः राजकन्याः, तासां निवहे समूहे, अवने सति रक्षणे सति, मुरपाशादि बन्धनमोचने सति । दिनस्य वासरस्य अन्ते समाप्तौ, रात्राविति यावत् । वासी वासवांत्सन् । नि. ''पुमान् निवासे सदने वासो वस्त्रे नपुंसकम्''। प्रमदावलिसंगतः प्रमदाः स्त्रियः, षोडशसहस्त्र-राजकन्याः लब्धवानित्यर्थः ।

अन्यत्र - सत्याकरोल्लसितविग्रहभासमानः सत्यस्य शपथस्य, दुर्योधनकृतकैतव द्यूतकृत्ये त्रयोदशसंवत्सराः वनं गच्छामीति प्रतिज्ञां करोतीत्यर्थः । आकरः स्थानं, विग्रहः देहः, तेन भासमानः प्रकाशमानः सत्यवाक्यधुरंधर इति यावत् । नरकसंहरणः निरयनाशकः । सः अयं युधिष्ठिरः, दिनस्य दिवसस्य प्राक् प्रथमं, सूर्योदयकालमिति यावत् । ज्योतिषे सूर्याय, कं अर्घ्योदकं ददातीति कन्दः सन् । अतमसा तमोगुणभावेन सत्वगुणेनेति यावत् । अग्रजन्मनिवहे अग्रजन्मनां ब्राह्मणानाम् । नि. ''द्विजात्यग्रजन्मभूदेवबाडबा'' इत्यमरः । निवहे समुदाये, प्रमदावलि-संगतः सन्तोषसमूहसहितः । अन्ते रम्ये, वने विपिने, वासी निवासी, अभूत् आसीत् ।। नि. ''मृताववसिते रम्ये समाप्तावन्त इष्यते''। इत्यमरः।।

वसन्त तिलका वृत्तम् - ''उक्तावसन्ततिलका तभजा जगौ गः'' इति लक्षणात् ।।

.....

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

हर्षकरीम् यद्वा-स्थिरां शाश्वितां आनन्दनां आ समन्तान्नन्दनां हर्षकरीम्। नि. ''नंदनं वासवोद्याने सुते हर्षकरे त्रिषु''। कृष्णां द्रौपदीं मुदा संतोषेण उदवहत् उदूहे ।। वृत्तन्तु शार्दूलविक्रीडितम् । लक्षणंतूक्तम्।

अव - अथ लक्ष्मणादीनां त्रयाणां पाणिग्रहणं,
श्रीकृष्णस्य ज्ञाति जनान्दनत्वं, भीमादीनां
चतुर्णामुद्वाह प्रकारं च विशदयति -

29. गद्य - तदनन्तरमसौ क्रमेण कल्याणलब्धैः
सप्रमदैः स्वैः सोदरैरर्चितः सन् रराज ।। २९

तदनन्तरमिति - तदनन्तरं सीतादिविवाहानन्तरं क्रमेण रीत्या कल्याणलब्धैर्विवाहप्राप्तैः सप्रमदैरूर्मिला माण्डवी श्रुतकीर्ति नाम्नीभिः सहितैः । नि. ''प्रमदा मानिनी कान्ता'' इत्यमरः । स्वैः स्वकीयैः सोदरैः भ्रातृभिः लक्ष्मणभरतशत्रुघ्नैरर्चितः पूजितः सन् असौ श्रीरामः रराज बभासे ।

अन्यत्र - तदनन्तरं कंसवधानन्तरं कल्याणलब्धैः शुभप्राप्तैः सुवर्णलब्धैश्च । नि.''स्यात् कल्याणं सुवर्णेऽपि मंग ..... । अभयैः समदैः सस्त्रीकैः स्वैः ज्ञा .....। नि. ''स्वोज्ञाता वर्तमनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने''।''..... काशे शर्मणि चेति शेषः ।।..... रराज बभासे ।।

अन्यत्र - तदनन्तरं ..... क्रमेण रीत्या कल्याणलब्धै र्विवाहोत्सवप्राप्तैः सप्रमदैः प्रमदया दौपद्या सहितैः । स्वैः निजैः सौदरैः अनुजैर्भीमार्जुननकुलसहदेवैरर्चितः पूजितः सन् असौ युधिष्ठिरः रराज बभासे ।।

In Public domain. Digitization Muthulakshmi Research Academy

अव - श्रीरामः दशरथं प्रणम्य सीतामुदूह्य अयोध्यां प्रति प्रस्थितः सन् मार्गे स्वजिगीषया समागतं परशुराममभिभवति स्म । श्री कृष्णः कंसनिर्बन्धेन दुःखव्याकुलचित्तं स्वामातामहमुग्रसेनं पट्टाभिषिक्त-मकरोदिति, युधिष्ठिरः द्रौपदीं परिणीय प्रस्थानसमये युद्धाय समापतंतं दुर्योधनं विजिग्ये - इति प्रदर्शयति -

30. निःशक्तिमन्तं सहसा गृहीत्वा
रामं सचापं नमितः सबाणम् ।
तमुग्रसेनं धृतराष्ट्रजातं
कुरुं प्रणम्याथ प्रभुं चकार ॥ ३०

निःशक्तिमन्तमिति - अथ अनन्तरं नमितः अमितः न इत्यस्य न शब्दस्य सुप्सुपेति समासः । अपरिमेय इत्यर्थः । सः श्रीरामः । उग्रसेनं उग्राः दारुणाः सेनाः चम्वः यस्य तम् । नि. ''उग्रः शूद्रासुते क्षत्राद्रुदे ना दारुणे त्रिषु''॥ धुतराष्ट्रजातं राष्ट्रानां राज्यानां जातं समूहः, धृतं राष्ट्रजातं यस्य तं । प्रभुं प्रभवति समर्थो भवतीति प्रभुः तं, ''भूसत्तायाम्'' । तं गुरुं तातं दशरथम् । नि.''गुरुर्गीष्पतिपित्रादौ'' इति। ''उपाध्यायः पिता ज्येष्ठो भ्राता चैव महीपतिः । मातुलः श्वशुरस्त्राता मातामहपितामहौ । वर्णज्येष्ठः पितृव्यश्च पुमांसो गुरवः स्मृताः''॥ ''माता मातामही गुर्वी पितुर्मातुश्च सोदरी । श्वश्रूः पितामही ज्येष्ठा भगिनी गुरवस्त्रिय'' इति शेषः ॥ प्रणम्य अभिवाद्य चापं परशुरामदत्त नारायणीयं धनुः सबाणं सशरं गृहीत्वा संगृह्य, तत्र शरं संधायेति यावत् । ..... सहसा आशु निःशक्तिमन्तं निर्गतबलवन्तं ..... र्या मुत्साहादौ बले स्त्रियां'' । ..... चकार अकरोत् । परशु ..... ॥

In Public domain. Digitization Muthulakshmi Research Academy

युधिष्ठिरपक्षे - अन्यत्र - अथ अनन्तरं सः युधिष्ठिरः । रामं .... ति धातुभ्यां शाश्वितमित्य ..... मं बलरामं च । प्रणम्य अभिवाद्य । मनसा ध्यात्वेत्यर्थः । इतः पांचालपट्टणे आपन्नम् आगतम् । नि. ''आपन्नः प्राप्तसापदोः''। सबाणं बाणैः सहितम् । दिव्यबाण संपन्नमित्यर्थः। गुरुं अलधुं उग्रसेनं उग्रस्य हरस्य सेनेव सेना यस्य तं प्रभुं राजानं च, धृतराष्ट्रजातं धृतराष्ट्र ..... निः शक्तिमन्तं निर्गतबलवन्तं चकार अकरोत् । दुर्योधनं निस्त्राणं चकारेत्यर्थः ।

श्रीकृष्णपक्षे - अन्यत्र - अथ अनन्तरं सः श्रीकुष्णः धृतराष्ट्र जातं धृतं राष्ट्रजातं राज्यसमूहो यस्य तं गुरुं भ्रातरं तं बलरामं प्रणम्य अभिवाद्य, आपन्नमापद्गतं, सबाणमार्तध्वनिसंयुतं, दुःख सहितमित्यर्थः । कंसेनेति शेषः । ''वणतीति बाणः''। ''वणक्कणशब्दे''। उग्रसेनं तदाख्यं मातामहं गृहीत्वा अभिगम्य, निगलबन्धनान्मो-चयित्वेत्यर्थः। इतः मधुरायां निःशक्तिमन्तं नितरां बलवन्तम् । तेजोवन्तमित्यर्थः । प्रभुं च राजानं च सहसा आशु चकार चक्रे ।। वृत्तमुपजातिः । इन्द्रोपेन्द्रवज्रामिश्रणात् । लक्षणंतु ''स्यादिन्द्रवज्र यदि तौ जगौ गः'' इति । उपेन्द्रवज्रा जतजाश्चगोगः'' इति ।।

अव - अथ श्रीरामः सीतालक्ष्मणभरतशत्रुघ्नबन्धुजनैः, साकं अयोध्यां प्राप्य दशरथस्यानन्दमुत्पादयन् स्वमंदिरे समवात्सीदिति । श्रीकृष्णः अवन्तीनगरमेत्य सान्दीपनिमाचार्यमशिश्रियत् इति । युधिष्ठिरः अनुजैः साकं हस्तिनापुरीमधिगम्य धृतराष्ट्र प्रियंकरः सन्नवसदिति च स्पष्टयति ।

In Public domain. Digitization Muthulakshmi Research Academy

31. रामानुजः सहित बन्धुजनः प्रकुर्वन्
तां भासुरां गजपुरीं रुचिरामयोध्याम् ।
हर्षं गुरोर्नश्वरैर्न्यवसत्प्रभूतां
सोऽसौ गतोऽथ भवने धनिकामवन्तीम् । ३१

रामानुज इति - अथ परशुरामपराभवानन्तरं रामानुजः रामाः मनोहरा अनुजाः लक्ष्मणभरतशत्रुघ्नाः यस्य सः । यद्वा - रामाभिः ऊर्मिला माण्डवीश्रुतकीर्ति नाम स्त्रीभिः युक्ताः अनुजाः लक्ष्माणादयः यस्य सः । नि. ''रामः पशुविशेषे स्याज्ज्ञामदग्न्ये हलायुधे । राघवे चासितश्वेत मनोज्ञेषु च वाच्यवत्''।।''सुन्दरीरमणी रामा'' इति चामरः। यद्वा - राति प्रकाशते इति 'रा' । रा च सा मा लक्ष्मीः । सीतेति भावः। अनुजाः लक्ष्मणादयः यस्य सः । ''राजृदीप्तौ''। सहितः ..... संगताः बन्धुजनाः ..... असौ श्रीरामः भासुरा ..... प्रकाशमानः अंगजः मन्मथः तेन पुरीं ..... पालन पूरणयोः । ..... जभिः अवन्तीं रक्षन्तीं धनिकां ..... रुचिरां सुन्दरां नामयोध्यां साकेत नामपुरीं गतः प्राप्तः । गुरोः पितुः दशरथस्य हर्षं संतोषं प्रकुर्वन् रचयन् भवने मन्दिरे न्यवसत् उवास ।

अन्यत्र - अथ उग्रसेनपट्टाभिषेकानन्तरं सहित बन्धुजनः हिताः इष्टाः बन्धुजनाः बान्धवजनाः हिताश्च ते बन्धुजानाश्च हितबन्धुजनाः, हितबन्धुजनैः सह स्थितः सहितबन्धुजनः । सः पूर्वोक्तः । असौ रामानुजः, रामस्य बलरामस्य अनुजः श्रीकृष्णः भासुरां प्रकाशमानाम् नश्वरैर्नरश्रेष्ठैः रुचिरां सुन्दरां अयोध्यां अजय्यामंगजपुरीम् । अगजस्य मन्मथस्य पुरीपालनं यस्यास्ताम् । युवजनपरिपूर्णामितिभावः ।

In Public domain. Digitization Muthulakshmi Research Academy
श्लोकस्मिन् ''भासुरागजपुरी'' इत्यत्र भासुरामिति छेदे 'गजपुरीं' इत्येव, नत्वंगजपुरीं भवति । चिन्त्यमेतत् व्याख्यानम् ।। (के.वि.राघवाचार्यः)

प्रभूतां बहुलां तामवन्तीं अवन्तीनाम उज्जयितनीपुरीं गंतः प्राप्तः गुरोः आचार्यस्य सांदीपनेः भवने मन्दिरे हर्षं गुरुशुश्रूषया संतोषं प्रकुर्वन् रचयन् न्यवसत् उवास । विद्याप्राप्तवानित्यर्थः ।

अन्यत्र - अथ पांचालपुराद्रामानुजः राः धनानि तेषां मा संपत् तया धनसंपदा युक्ताः अनुजाः भीमार्जुननकुलसहदेवाः यस्य सः । यद्वा - रामा स्त्री द्रौपदी । नि. ''सुन्दरी रमणी रामा'' इत्यमरः । अनुजाः भीमादयः यस्य सः । नि. ''राः स्त्रियां होमशालायामारांसायां गतावपि। राः पुमान् पावके हेम्नि समर्थातिशये बले ।। इति च । सहितबन्धुजनः हितबन्धुजनेन सह वर्तत इति सहित बन्धुजनः, सः असौ युधिष्ठिरः नश्वरैर्नरश्रेष्ठैः राजभिः विद्वद्भिश्च अवंतीं रक्षन्तीम् । नि. ''वरो जामातरि वृत्तौ देवतादेरभीप्सिते । षिड्गे पुंसि त्रिषु श्रेष्ठे कुंकुमे तु नपुंसकम् । मनाक् प्रिये वरं क्लीबं केचिदाहुस्तदव्ययम्'' ।। धविकां अ..... योद्धुमशक्थां रुचिरां मनोहरां भासुरां प्रकाशमानां तां गजपुरीं हस्तिनापुरीं गतः प्राप्तः गुरोः पितृव्यस्य धृतराष्ट्रस्य । नि. ..... चैव महीपतिः मात ..... पितामहौ । वर्णज्येष्ठपितृव्यश्च पुमाँसो गुरवस्स्मृताः । माता मातामही गुर्वी पितुर्मातुश्च सोदराः । श्वश्रूः पितामही ज्येष्ठभगिनी गुरवः स्त्रियः'' । इति ।''दुर्भरालघुनोर्दीर्घसंयुक्तपरयो र्गुरु'' रिति शेषः ।। हर्षं संतोषं प्रकुर्वन् सन् रचयन् सन् भवने मन्दिरे न्यवसदुवास ।

CC-0. Jangamwadi Math Collection. Digitized by eGangotri Siddhanta Research Academy

वसन्ततिलकावृत्तम् । उक्तं वसन्ततिलकं तभजा जगौ गः'' इति लक्षणात् ॥

अव - श्रीरामः दशरथस्य संतोषं कुर्वन् यशःप्राप, श्रीकृष्णः विद्यामधीत्य मृतपुत्रसमर्पणया आचार्य मनोरथं निर्वर्त्य गुरुकुलात् प्रतिनिवृत्तो मधुरां लेभे । युधिष्ठिरः धृतराष्ट्रस्य प्रमोदं कुर्वन् समज्ञामगमदिति च, - विशदयति -

32. गुरोः कुमारं विद्याज्ञो
लेभे कीर्तिं गुणैः प्रदः ।
भासा पराक्रमेणासौ
हर्षं सन्मधुरां जितः ॥ ३२

गुरोरिति - विद्यां जानातीति विद्याज्ञः । सर्वज्ञ इत्यर्थः । भासा कान्त्या कुमारं मन्मथम् । नि.''कुमारो मन्मथे स्कन्दे युवरा ..... वाचके । बाले वरणवृक्षे च द्वीपे सत् (पुं) नपुंसकम्''॥ जितः जैत्रः पराक्रमेण प्रतापेन गुणैः शौर्यौदार्यदयादिभिश्च गुरोस्तातस्य दशरथस्य हर्षं संतोषं प्रदः सन् दत्तः सन् असौ श्रीरामः मधुरां मनोज्ञाम् । नि.''मधुरो ना रसे तद्वत् सुन्दर स्वादुषु त्रिषु । मधुरा शीतपुष्पा च कथ्यते मधुपुर्यपि'' । कीर्तिं यशः लेभे प्राप ॥

अन्यत्र - गुणैः सौजन्य-सौलभ्य-गांभीर्य-शुश्रूषादिभिः, विद्याज्ञः विद्यां सर्वविद्यां जानातीति विद्याज्ञः । चतुःषष्टि कलापारीण इत्यर्थः। पराक्रमेण जितः जैत्रः आचार्य पुत्रहन्तारं पंचजनासुरमिति शेषः।

In Public domain. Digitization Muthulakshmi Research Academy
''कृष्णः आचार्येण प्रभासतीर्थस्नानाय गतं निजपुत्रं समुद्रेणापहृतं दक्षिणां देहीति उक्तः सन् समुद्रं गत्वा समुद्रेण निवेदितं गुरुसुतहर्तारं पंचजनासुरं संहृत्य तदुदरे तमदृष्ट्वा, तदंगसंभवं पांचजन्यं गृहीत्वा संयमिनी नगरमेत्यापूरयति भगवति श्रीकृष्णे शंखरवाकर्णन समनंतरमेव गुरुपुत्रसमर्पणेन यमेन पूजित'' इति भागवती कथा ..... श्रीकृष्णः गुरोः सांदीपनेः ..... मृतपुत्रं, कीर्तिं, यशः, हर्षं, संतोषं ..... भासा कान्त्या मधुरां मधुरानाम .....

विद्यादि शास्त्रज्ञः पराक्रमेण ..... युधिष्ठिरः गुणैः शौर्यौ-दार्यदयादिभिः गुरोः पितृव्यस्य धृतराष्ट्रस्य हर्षं संतोषं प्रदः दत्तः सन् भासा कान्त्या मधुरां सुन्दरां कीर्तिं समज्ञां लेभे अलभत ॥

अव - श्रीरामः अयोध्यां प्रकाशमानां चक्रे-इति,
श्रीकृष्णः द्वारकां प्रभायुक्तामकरोदिति,
युधिष्ठिरः इन्द्रप्रस्थपुरीं देदीप्यमानां चकारेति च विशिनष्टि

33. गद्य - द्वारकांचितेन्द्रप्रस्थलसद्विख्याताभिख्या । रुचिरा परायोध्येति पुरी रराजामुना ॥ ३३

द्वारकेति - द्वारकांचिता द्वार एव द्वारकः । स्वार्थे कप् । द्वारकैः प्रतीहारैः अंचिता पूजिता । इन्द्रप्रस्थलसद्विख्याताभिख्या रुचिरा । स्थलं स्थानं प्रकर्षं च तत् स्थलं च प्रस्थलं, इन्द्रस्य सहस्राक्षस्य प्रस्थलं स्थानं स्वर्गं इन्द्रप्रस्थलमिव नाक इव सती श्रेष्ठा विख्याता प्रसिद्धा अभिख्या शोभा तया रुचिरा मनोहरा । परा श्रेष्ठा अयोध्या इति पुरी साकेतपुरं अमुना श्रीरामेण रराज बभासे ॥

In Public domain. Digitization Muthulakshmi Research Academy

अन्यत्र - इन्द्रप्रस्थलसद्विख्याताभिख्या रुचिरा, स्वर्ग इव श्रेष्ठा प्रथिता शोभा सुन्दरा । परायोध्या परैः शत्रुभिः अयोध्या योध्दुमशक्या, अंचिता पूजिता द्वारका द्वारकानाम पुरी, अमुना श्रीकुष्णेन रराज विरेजे । जरासन्धभयाद्विश्वकर्मणा मध्ये समुद्रं द्वारकां निर्माय स्वजनै-र्भगवानध्युवसेति भावः ॥

अन्यत्र - परायोध्या परैः शत्रुभिः अयोध्या अजय्या, द्वारकांचिता द्वारकैः प्रतीहारैः । नि. ''द्वर्द्वारं प्रतीहार'' इत्यमरः । अंचिता पूजिता। इन्द्रप्रस्थलसद्विख्याताभिख्या रुचिरा, इन्द्रप्रस्थं इति लसती राजती विख्याता प्रथिता अभिख्या नाम तया रुचिरा मनोहरा पुरी अमुना युधिष्ठिरेण रराज शुशुभे । अर्धराज्याभिषिक्तो युधिष्ठिरो धृतराष्ट्रानुमत्या इन्द्रप्रस्थं जगामेति भावः ॥

अव - श्रीरामस्य ..... युधिष्ठिरस्य स्वकीयानुजप्रतापेन दि ..... श्रीकृष्णस्य भौष्मीपरिणयं च विशिनष्ठि -

34. श्री भीष्मसूनु संयोगो । विवाहं लब्धवांश्च सः ।
जिताशः सक्षमां प्राप्तो बलयुक्तो सुरार्चितः ॥ ३४

श्रीरिति - विवाहं विः पक्षी ..... गरुड इत्यर्थः । वाहः अश्वः गरुडतुरगः । नि. ''विश्वक्षुषि व्योम्निावाते परमात्मनि पक्षिणि'' इति विश्वः । नि. ''वाजिवाहार्वगंधर्व हयसैंधव सप्तयः'' इत्यमरः । गरुडवाहनमित्यर्थः । तं लब्धवान् प्राप्तवान् बलयुक्तः बलेन पराक्रमेण युक्तः संयुतः । सुरार्चितः सुरन्तीति सुराः । ऐश्वर्यशालिनः । सुर ऐश्वर्ये। सुष्ठु राजन्त इति वा सुराः । ''राजृदीप्तौ'' । ब्रह्मविष्णुमहेशाः ।

In Public domain. Digitization Muthulakshmi Research Academy
तैरर्चितः पूजितः । यद्वा - असुरार्चितः असुरैः प्रह्लादादिभिः अर्चितः पूजितः । श्री भीष्मसूनुसंयोगः श्रीः संपद्युक्ताः, भीष्माः भयंकराः । शत्रूणामिति शेषः । सूनवः अनुजाः लक्ष्मणादयः । नि. ''सूनुः पुत्रेऽनुजे रवौ''। तैः संयोगः संगतः । जिताशः जिता आशा कांक्षा येन सः । निष्काम इत्यर्थः । सः श्रीरामः । क्षमां क्षान्तिं प्राप्नोत् आयात् ।

अन्यत्र - बलयुक्तः बलेन बलरामेण युक्तः मिलितः, सुरार्चितः सुरदैवैरर्चितः पूजितः, जिताशः जिताः आशाः दिशश्च येन सः । श्री भीष्मसूनुसंयोगः श्रीः शोभायुक्तः भीष्मः विदर्भाधिपः तस्य सूनुः पुत्री रुक्मिणी तया संयोगः मिलितश्च । सः श्रीकृष्णः,..... विवाहं परिणयं लब्धवान् प्राप्तवान् । क्षमां निजभूमिं । द्वारकामित्यर्थः । प्राप्नोत् आयात् ॥

अन्यत्र - बलयुक्तः बलेन शक्त्या युक्तः संयुतः श्री भीष्म सूनुसंयोगः श्रीः शोभायुक्ताः, भीष्माः भयंकराः द्विषामिति शेषः । नि. ''भीषणे त्रिषु भीष्मः स्यात् रुद्रगांगेययोस्तु ना'' । सूनवः अनुजाः भीमार्जुननकुलसहदेवाः । तैः संयोगः संसक्तश्च । विवाहं, वहति नरं वाहः । ''वह प्रापणे'' । वाहाः रथाश्वगजादयः । विशेषेण वाहं अश्वादिं, लब्धवान् प्राप्तवान् । सुरार्चितः, शुभं रान्ति ब्रुवंतीति सुराः । सत्पुरुषाः, तैरर्चितः पूजितः । ''रै शब्दे'' । जिताशः जिताः आशाः दिशः यस्य सः । सः युधिष्ठिरः, क्षमां क्षोणीं प्राप्नोत् आयात् । लब्धवानित्यर्थः । राजसूयाध्वरानुष्ठानाय सोदरैः सर्वं वसुन्धरामजैषीदिति भावः ॥

अवतारिका - श्रीरामः कैकेयीवरप्रदानेन व्याकुलचित्तनिज जनकवचनं सफलं कर्तुं सीतालक्ष्मणाभ्यां साकमरण्यं प्रतस्थे - इति,

Sponsored by Eternal Digitization Mythilalakshmi Research Academy

श्रीकृष्णः नरकासुरसंहारणायेन्द्रप्रार्थनया प्राग्ज्योतिषं प्रति प्रतस्थे- इति, युधिष्ठिरः दुर्योधन कैतवा ..... पत्नीत्रन् भार्यसोदरै स्समं वनमवजगामेति ..... ॥

35. गद्य - अथ स सामानुजोऽयं सुबलजातभार्या वरदेन मही सूनुधामापहृत परश्रिया गुरुणावनार्थेऽभिहितः पट्टणादगच्छत्॥ ३५

अथेति - अथ अभिषेकसंभारसञ्जीकरणानन्तरं सरामानुजः रामास्त्री सीता, अनुजः लक्ष्मणः, रामा चानुजश्च रामानुजौ, ताभ्यां सहितः सरामानुजः । मही नित्योत्सववान् । नि. ''मह उत्सव तेजसोः''। सूनुधामापहृतपरश्रिया सूनुः सूर्यः, तस्य धाम रश्मिः, तदिव धाम रश्मिः, तेनापहृता गृहीता परश्रीः शत्रुशोभा यस्य तेन । पराक्रमेण जितशत्रुगण इत्यर्थः । नि. ''सूनुः पुत्रेऽनुजे रवौ'' । सुबलजातभार्या वरदेन सुबलं शोभनशक्तिः, तस्य जातं समूहः यस्याः सा तादृशी भार्या पत्नी कैकेयी, तस्याः वरदेन वरप्रदानेन । देवासुरयुध्दे कृत सारथ्यायाः कैकेय्याः वरप्रदानहेतुनेति भावः । गुरुणा पित्रा दशरथेन अभिहितः उक्तः, अयं श्रीरामः, वनार्थे वनप्रयोजने । चतुर्दशसंवत्सरवन वासार्थमिति यावत् । पट्टणात् अयोध्यायाः अगच्छत् अयात् ।

अपरत्र - अथ अनंतरं सुबलजातभार्यावरदेन सुबलेन शोभनरूपेण जाता उत्पन्ना भार्या पत्नी शचीदेवी तस्याः वरदेन इष्टवस्तु प्रदानेन, तस्याः पतित्वादभीष्टप्रद इति यावत् । यद्वा - सुबलेन शोभन बलेन जाताः उत्पन्नाः भार्याः भृत्याः, देवादि मनुष्याः । भर्तुं पोषितुं योग्याः भार्याः । ''भृञ् धारणपोषणयोरिति धातुः'' । तेषां वरदः अभीष्टप्रदः । निर्दिष्टकार्यकरणानंतरं पारितोषिकवेतनादि द्रव्यप्रदानेन

In Public domain. Digitization Muthulakshmi Research Academy
सन्मानेन च आनंदकर इत्यर्थः । नि. बलं गन्ध रसे रूपे स्थार्मानस्थौल्य सैन्ययोः । पुमान् हलायुधे दैत्यप्रभेदे वायसेऽपि च ।। ''बलयुक्तेऽन्य-लिंगं स्यात् बलावाट्यलकेऽस्त्रियाम् । महीसूनुधामापहृतपरश्रिया मह्याः भूम्याः सूनुः पुत्रः नरकासुरः, तस्य धाम प्रभावः, तेन अपहृता गृहीता परा मुख्या श्रीः संपत् यस्य तेन, गुरुणा भ्रात्रा देवेन्द्रेण अभिहितः प्रार्थितः, सः पूर्वोक्तः, अयं रामानुजः रामस्य बलरामस्य अनुजः कृष्णः, अवनार्थे रक्षण प्रयोजने पट्टणात् ..... अगच्छत् निरगात् ।।

अन्यत्र - अथ राजसूययागानन्तरं सुबलजातभार्यावरदेन सुबलस्य सुबल नामधेयस्य राज्ञः, जाता भार्या पत्नी गांधारी तस्याः वरदेन अभीप्सित वस्तु प्रदानेन पतिव्रतायाः गांधार्याः मनोभीष्टप्रद इत्यर्थः । सूनुधामापहृतपरश्रिया सूनुः पुत्रः दुर्योधनः, तस्य धाम्ना कैतवप्रभावेन अपहृता गृहीता परा मुख्या श्रीः युधिष्ठिर संपत् यस्य तेन, गुरुणा पितृव्येन धृतराष्ट्रेण अभिहितः उक्तः, मही महः तेजः अस्यास्तीति मही (?) तेजस्वीति यावत् । नि. ''मह उत्सव तेजसाः''। स रामानुजः रामा द्रौपदी, अनुजाः भीमादयः, तैः सहितः स रामानुजः। अयं युधिष्ठिरः पट्टणात् हस्तिनापुर्याः वनार्थे अरण्य- विषये अगच्छदयतेस्म ।।

अव - कृत सायं संध्योपास्ते रामस्य प्रथमदिने रात्रौ तमसानदीतीरे निवासं, कृष्णेन मुरपाशादि दुर्गलक्षणनाशपूर्वकं नरकासुरं हत्वा तद्बन्दीकृत षोडशसहस्रस्त्री समागमं, युधिष्ठिरस्य स्वानुगतब्राह्मण समूहसंरक्षणकृते सूर्योपास्तिं च विशिनष्टि -

36. सत्याकरोल्लसितविग्रह भासमानो

प्राग्ज्योतिषे नरकसंहरणो स वासी ।

In Public domain. Digitized by Muthulakshmi Research Academy

कंदोऽग्रजन्मनि वहे तमसा वनेय

मंते दिनस्य प्रमदावलि संगतोऽभूत् ॥ ३६

सत्याकर इति - सत्याकरोल्लसितविग्रहभासमानः सत्यस्य तथ्यस्य, आकरः निलयः, उल्लसितः प्रकाशितः, विग्रहः देहः, तेन भासमानः देदीप्यमानः । सत्यस्वरूपवानित्यर्थः । ''सत्येन लोकान् जयति दीनान् दानेन राघवः । इति प्रमाणात् । नि. ''सत्यं शपथतथ्ययोः''। इत्यमरः । नि. ''शरीरं वर्ष्म विग्रहः''। इत्यमरः । नरकसंहरणः निरयनाशकः । नि. ''नरके निरयेऽसुरे'' ।

प्रमदावलिसंगतः संतोषसमुदाययुक्तः । नि. ''गर्वे मुदे च गंधे च प्रमदः प्रमदास्त्रियाम्''। सः पूर्वोक्तः अयं श्रीरामः, दिनस्य दिवसस्य अंते सायंकाले, अग्रजन्मनि वहे, अग्रजन्मानः श्रेष्ठजन्मानः ऋषयः । नि. ''अग्रं प्रा ...हरं श्रेष्ठं मुख्यं वर्यं प्रबर्हण'' मित्यमरे त्रिकांडशेषः । तेषां निवहः समूहः यस्मिन् तस्मिन् तमसा वने तमसानदी विपिने । यद्वा - तमसावने तमसा जले । तत्तीरे इति यावत् । ज्योतिषे सूर्याय । नि. ''ज्योतिर्नाग्न्यर्कचन्द्रेषु क्लीबं खद्योतदृष्टिषु''।। कंदः कं ददातीति कन्दः । अर्घ्यप्रदः सन् वासी निवासी, अभूत आसीत्।।

अन्यत्र - सत्याकरोल्लसितविग्रहभासमानः सत्यायाः सत्यभामायाः कराभ्यां बाहुभ्यामुल्लसितः प्रकाशितः विग्रहः रणः, तस्मिन् भासमानः । सत्यभामोल्लासकरयुद्धसन्तुष्ट इत्यर्थः । प्राग्ज्योतिषे तदाख्ये भौमपुरे । नि.''प्राग्ज्योतिषं काम ..... म पु रः विदुः । नरकसंहरणः नरकासुसंहारकः । कं सुखं ददातीति कन्दः । लोकानामिति शेषः । यद्वा - कं सुखं द्यति खण्डयतीति कन्दः । शत्रूणामिति शेषः । नि. मूर्ध्निं

In Public domain. Digitization Muthulakshmi Research Academy
चित्ते जले काये सुखे ब्रह्मणि मारुते । कामे फले सुवर्णे च कः शब्दो द्रविणावपि''। ''दोऽवखण्डने'' इति धातुः। सः अयं श्रीकृष्णः । अतमसा अतमोगुणेन, सत्वगुणेनेति यावत्। अग्रजन्मनिवहे अग्राणि श्रेष्ठानि जन्मानि यासां ताः राजकन्याः, तासां निवहे समूहे, अवने सति रक्षणे सति, मुरपाशादि बन्धनमोचने सति । दिनस्य वासरस्य अन्ते समाप्तौ, रात्राविति यावत् । वासी वासवांत्सन् । नि. ''पुमान् निवासे सदने वासो वस्त्रे नपुंसकम्''। प्रमदावलिसंगतः प्रमदाः स्त्रियः, षोडशसहस्त्र-राजकन्याः लब्धवानित्यर्थः ।

अन्यत्र - सत्याकरोल्लसितविग्रहभासमानः सत्यस्य शपथस्य, दुर्योधनकृतकैतव द्यूतकृत्ये त्रयोदशसंवत्सराः वनं गच्छामीति प्रतिज्ञां करोतीत्यर्थः । आकरः स्थानं, विग्रहः देहः, तेन भासमानः प्रकाशमानः सत्यवाक्यधुरंधर इति यावत् । नरकसंहरणः निरयनाशकः । सः अयं युधिष्ठिरः, दिनस्य दिवसस्य प्राक् प्रथमं, सूर्योदयकालमिति यावत् । ज्योतिषे सूर्याय, कं अर्घ्योदकं ददातीति कन्दः सन् । अतमसा तमोगुणभावेन सत्वगुणेनेति यावत् । अग्रजन्मनिवहे अग्रजन्मनां ब्राह्मणानाम् । नि. ''द्विजात्यग्रजन्मभूदेवबाडबा'' इत्यमरः । निवहे समुदाये, प्रमदावलि-संगतः सन्तोषसमूहसहितः । अन्ते रम्ये, वने विपिने, वासी निवासी, अभूत् आसीत् ।। नि. ''मृताववसिते रम्ये समाप्तावन्त इष्यते''। इत्यमरः।।

वसन्त तिलका वृत्तम् - ''उक्तावसन्ततिलका तभजा जगौ गः'' इति लक्षणात् ।।

.....

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy
Osmania University, Hyderabad – 500 007
Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
www.osmania.ac.in\sanskritacademy

ISBN – 978-93-80171-41-8

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy
Osmania University, Hyderabad – 500 007
Phone & Fax: 040 - 27070281
Email: sanskritacademyhyd@gmail.com
www.osmania.ac.in\sanskritacademy